
KRAMADIPIKA.

(A Tantric Text).



Published under the Authority of
His Highness Shri Rajarajeshvar Maharajadhiraj Maharaja
SHRI HARISINGHJI BAHADUR,
G. C. I. E., K. C. V. O.,
OF
JAMMU & KASHMIR



Edited with introduction
BY
RAM CHANDRA KAK
Director of the
ARCHÆOLOGICAL & RESEARCH DEPARTMENT
JAMMU & KASHMIR GOVERNMENT.
AND
HARABHATTA SHASTRI.




SRINAGAR:
Printed at the Kashmir Mercantile Press.
1929.

२३ जून '५९, मंगलवार

KRAMADIPIKA.

(A Tantric Text).



Published under the Authority of


His Highness Shri Rajarajeshvar Maharajadhiraj Maharaja

SHRI HARISINGHJI BAHADUR,

G. C. I. E., K. C. V. O.,

OF

JAMMU & KASHMIR



Edited with introduction

BY

RAM CHANDRA KAK


Director of the

ARCHÆOLOGICAL & RESEARCH DEPARTMENT

JAMMU & KASHMIR GOVERNMENT.

AND

HARABHATTA SHASTRI.



SRINAGAR:

Printed at the Kashmir Mercantile Press.

1929.

Introduction

KRAMADIPIKA or "light on the path" is a *Vaishnava* Tantra, Gopala-Vishnu being the presiding deity. The *Krama* "path," is the worship of the Supreme Being herein termed Bala-Gopala, as enjoined and described in the text. The author nowhere mentions his own name though in the 13th verse of the last Chapter, he states : "*Dipikeyam mayodbhashyate kramatah Krishna-mantra-gaditanam*;" but no name follows the personal pronoun "*maya.*"

It claims that the *Gopala mantra* is much more efficacious than all other mantras, inasmuch as the latter rarely become fruitful and always require that the *Sadhaka* should necessarily belong to one of the four *Varnas* and *Ashramas*, while the *Gopala mantra* never fails in its effect nor imposes any limitations of Caste or *Ashrama* on the worshipper.

A *mantra* can be used as a beneficent power or as an offensive or defensive force by the performance of a *Purashcharana*. This is an elaborate process consisting of five main parts, namely: *Japa*, *Havana*, *Tarpana*, *Marjana*, and *Brahma-bhoja*. *Japa* is mental recitation of the *mantra* as many lacs of times as the number of syllables it contains. Occasionally the number is arbitrarily fixed, but in no case is it less than ten thousand. *Havana* consists of offering various fruits, ghee, sugar, grains, and other eatables in a sacrificial fire. *Tarpana* is the offering of handfuls of water to the deity. *Marjana* is the ceremonial sprinkling of water in which are kept twigs and leaves of herbs called *Sarvaushadhi*, "all herbs". *Brahma-bhoja* is the feeding of Brahmanas at the end of the ceremony. It is essential that *Havana*,

Tarpana, *Marjana*, and *Brahma-bhoja* be accompanied by the recitation of the *Mantra*. The number of times each succeeding ceremony is repeated should be a tenth of the number of the preceding one. Thus the number of Brahmanas to be fed at the end of the *Purashcharana* should be one-tenth of the sprinklings.

The *Purashcharana*, though very important in itself, is not efficacious unless the performer is possessed of certain personal qualifications. The term *Adhikari* is applied to a person who by the special grace of God is rendered fit to perform the *Purashcharana*. He has to bathe every morning, put on ceremonially clean clothes, keep his hands ceremonially clean, paint the *pundra* mark on the forehead, take his seat facing east, worship his Guru, and then begin the worship of Ganesha. Having cleansed his hands by the *Astra mantra*. "*phat astraya phat*," he should purify his *Bhuta-Sharira*. or "Spiritual body". This is an intricate process of auto-suggestion. Having purified himself as stated above and having performed the worship of Ganesha, he mentally suggests to himself that his body is being consumed by *Kálágni*, the all-destroying fire of the *Kalpanta*. After it has been reduced to ashes he imagines that a powerful storm blows away the ashes, leaving no visible trace of them behind, and then an incessant rain-storm washes away even the invisible particles and completely cleans the scene of the cremation. Thus the *sadhaka* by auto-suggestion reduces his physical body to extinction and totally loses conciousness of his external surroundings and even of the existence of his physical body. He then imagines that a shower of ambrosia falls on the site of the cremation and there springs up a divine body free from all human passion and weakness, which he inhabits. This imaginary destruction of the animal body and its replacement by a spotless celestial body by means of auto-suggestion is called the

Bhuta-sharira-shodhana, literally, the purification of the body composed of elements. Even this is not deemed enough; for, though the *Sadhaka* has attained *tadatmya* (oneness, at-onement), with his *Ishtadeva*, he is apt to forget that the *Ishtadeva* is identical with the visible and invisible universe. To effect this the *Sadhaka* has to perform the *Matrika nyasa*. The Matrikas are spiritual forces represented in the mundane world by the 48 letters of the alphabet. The 31 letters from *Ka* to *Sa* represent the *tattvas* (principles). The vowels represent *Shuddha–Vidya*, *Ishvara*, *Sadashiva*, *Shakti* and *Shiva tattvas*. The last letter *Ha* combined with *A* the first letter of the alphabet, and the nasal *bindu* represents Paramashiva embodying and pervading the whole universe while transcending it at the same time. *Nyasa* is a psychic process by which the different *Varna-shaktis*, the forces underlying the letters of the alphabet, are located in imagination on and identified with, the different parts of the *Sadhaka's* body. Thus by the performance of the *Matrika nyasa* the *Sadhaka* who has achieved *tadatmya* with the individual Vishnu is enabled to expand his consciousness further and make it pervade and transcend the entire universe. Having attained this stage of psychic consciousness the aspirant has *Adhikara*, or in other words is fit, to recite and use all *Vaishnava mantras*. An essential feature of the purification is *Pranayama*. It is stated that the performance of 16 *Pranayama* exercises accompanied by the *Japa* of *Gopala mantra* after *Bhutashuddhi*, as stated above, results in the aspirant acquiring a state of complete sinlessness within a month. The *pranayama* described in this text has the distinction that it comprises four steps : *rechak*, *puraka*, *kumbhaka*, and *rechaka*, over again, instead of only three as is usually the case.

The *Vaishnava mantras* described in the text are given in the table at the end of this introduction : —

Nyasa is of three kinds, *Srishti krama*, *Sthiti krama*, and *Samhara krama*. The first is prescribed for the *Brahmachari*, the second for the *Grihastha*, and the third for the *Vanaprastha* and the *Sannyasi*. They have their distinguishing characterstics. In the *Srishti krama* the alphabet begins in the right order and each letter is joined with the *bindu*. In the *Sthiti krama* the letters are recited from *Dha* to the end and then from *A* to *Da*, and to each letter is joined the *anusvara* and *visarga*. In the *Samhara Krama Nyasa* the alphabet is recited in the reverse order, conjoined with a *bindu*.

The *Sadhaka* while meditating should place before his mind's eye the following *dhyana* of Gopala. He should imagine Him under a *Kalpa* tree in *Vrindavana* seated on a golden eight-petalled lotus and surrounded by *Gopis* attired like Himself, singing and playing on various kinds of musical instruments, wearing beautiful ornaments, as also by Brahmanas, celestial beings, and heavenly musicians. The *Sadhaka* should in his imagination identify himself with *Gopala* and having worshipped Him as his own true self with the *Upacharas* namely, the offering of *Asana*, *Padya*, *Arghya*, *Achamana*, *Gandha*, *Pushpa*, *Dhupa*, *Dipa*, *Naivedya*, *Madhuparka*, *Alankara*, etc., he should perform the *mantra japa*.

Everybody, however, is not entitled to perform the *japa* of a *mantra* unless he has obtained the *Adhikara* or title to do so by a proper *Diksha* or initiation. This last is an elaborate ceremony consisting of (1). the construction of a *Vedi* or altar, (2) offerings to *Vastu devatas*, (3) the laying out of the *Mandala* in various coloured powders (4) Worship of the *Guru*, (5) worship of the *pitha* on which the sacrificial jar is to be placed, (6) worship of the jar containing holy water, herbs etc. (7) *Mantra-japa* preceded by the worship of the *Avarana Deva* with 16 *upacharas*, (8) feeding of Brahmanas followed

by the bestowal of an appropriate *dakshina* on the *Guru*, by the *Shishya*. All this is to be done by the *Guru* who having finished these preliminary ceremonies, baptises the *shishya* and initiates him into the *mantra*. It is only such a *shishya* who is entitled to *mantra–japa*, and without proper initiation no one will be able to achieve any noteworthy results.

The mere fact of initiation does not, however, make a man an adept. To attain to that stage of perfection where he can make use of the *mantra* according to his desire, he has to undergo a long course of practice *(Sadhana)*; for instance in the case of the *mantra* of ten syllables, he has to perform 10,00,000 of *Japa*, 100,000 of *Havana*, 10,000 *Tarpana*, 1000 *Marjana*, 100 *Brahama-bhoja*.

The uses to which the *mantra* can be put are various, but for each different application of the *mantra* a different *dhyana* of the deity is prescribed : (1) If one is in need of food his *dhyana* should be that of *Gopala-Krishna* lying in his cradle, gently swayed to and fro by *Gopis* and fed with milk. (2) If it is desired to allay adversity or illness or misfortune, the *dhyana* of *Krishna* killing *Putana* is advised. (3) Long life and good health are obtained by meditating on youthful *Krishna* carrying milk and curds in his hands. (4) By meditating on *Krishna* dancing on the hoods of *Kaleya*, maladies caused by poisoning are cured. (5) Fever among children is allayed by meditating on *Krishna* holding the demon *Baka* by his beak and tearing him to pieces. (6) Distress caused by excessive rain, storm or lightning is averted by meditating on *Krishna* holding up *Govardhana* with his left hand and playing on his flute. (7) Rainfall and relief from fever are obtained by meditating on *Krishna*, sporting in the *Yamuna* with *Gopis* and sprinkling water on them. (8) By meditating on *Vishnu* riding on the *Garuda* and routing his enemies, one's opponents are vanquished.

Similarly special *dhyanas* of *Vishnu* relating to the various episodes of his life are prescribed for numerous objects, such as securing prosperity, attaining to the office of the High Priest to the King, obtaining children, gaining mastery over eloquent speech, bringing people under one's influence, as also for attainment of freedom from the sorrows and miseries of the world.

	मन्त्राः	देवता	ऋषिः	छन्दः
१	गोपीजनवल्लभाय स्वाहा ॥	कृष्णः	नारदः	विराट्
२	क्लीं कृष्णाय गोविन्दाय गोपीजन-वल्लभाय क्लीं स्वाहा ॥	कृष्णः	नारदः	गायत्री
३	ओं नमो भगवते वासुदेवाय ॥	,,	,,	विराट्
४	क्लीं कृष्णाय नमः ॥	,,	,,	,,
५	ह्रीं श्रीं ॥	,,	,,	,,
६	कृः ॥	,,	,,	,,
७	कृष्ण ॥	,,	,,	,,
८	क्लीं कृष्ण ॥	,,	,,	,,
९	क्लीं कृष्णाय ॥	,,	,,	,,
१०	कृष्णाय नमः ॥	,,	,,	,,
११	गोपालाय स्वाहा ॥	,,	,,	,,
१२	क्लीं कृष्णाय स्वाहा ॥	,,	,,	,,
१३	कृष्णाय गोविन्दाय ॥	,,	,,	,,
१४	श्रीं ह्रीं क्लीं कृष्णाय क्लीं ॥	,,	,,	,,
१५	क्लीं कृष्णाय क्लीं गोविन्दाय ॥	,,	,,	,,
१६	दधिभक्षणाय स्वाहा ॥	,,	,,	,,
१७	सुप्रसन्नात्मने नमः ॥	,,	,,	,,
१८	क्लीं गोपीजनवल्लभाय ॥	,,	,,	,,
१९	क्लीं ग्लौं क्लीं श्यामलाङ्गाय नमः ॥	,,	,,	,,
२०	बालवपुषे कृष्णाय स्वाहा ॥	,,	,,	,,
२१	बालवपुषे क्लीं कृष्णाय स्वाहा ॥	,,	,,	,,

क्रमदीपिकाया मुद्रणसमाप्तौ

उपलब्धस्य श्रीरघुनाथमन्दिरपुस्तकालयस्थस्य आदर्शपुस्तकस्य

इमानि पाठान्तराणि ।

पृष्ठसं०	पंक्तिसं०		
१	२	क्वणत्कणद्वेणु०	कलक्वणद्वेणु०
२	२४	कराद्यमिदम्०	कराङ्गमिदम्०
३	१	दन्तयुज्ञु०	दद्द्वयेषु०
४	३	जनार्दनो मा च०	जनार्दनोमे च०
४	८	विद्यती च०	विद्यते च०
,,	,,	मूर्तयो हलानां०	मूर्तयोऽत्र हलां०
५	१२	न्यसतात् तु०	च यतस्तु०
,,	१४	स्थानेषु यरलव०	स्थान् षो यलव०
,,	२०	विश्वमूर्त्यादिषु०	बिम्बमूर्त्यादिषु०
६	१६	कलादण्ड०	कलादन्त०
१०	२२	दपि नोक्तः०	दपि चोक्तः०
,,	२३	एतेऽभिमुखोऽनुक्रमत०	एतेऽभिख्येऽनुक्रमशः०
११	१०	र्हार्दकृत्यैर्विधेय०	र्हार्दहृद्यैर्विधेय०
१२	१२	स्थितिम्०	स्थितिन्यास०
,,	२०	श्रवसि(?)विहिता०	श्रवोविहिता०
१३	८	स्थलं०	स्थली०
१४	१५	न्तः श्रवणादियुगल०	न्तरश्रवणादिनोयुगल०
,,	१७	त्तराणि०	त्तरं०
,,	१८	नयनहृ०	नयनमुखहृ०
१५	१	ङ्गत०	द्रुत इति शुद्धः पाठः ।
,,	१५	पुरा वापि०	दिवारात्रि
१७	५	भानुभाभास्वरा०	भानुवद्भास्वरा०
,,	२०	चित्रमालस्०	चिल्लिमालस्०

पृष्ठसं०	पंक्तिसं०		
१८	२०	केतुजवा०	केतुयवा०
१९	६	सप्रस्रव०	सप्रस्तव०
,,	१०	लास्यावगाढसृत०	लास्यावटत्तरित०
,,	११	वेणुप्रवर्तित०	वेणुप्रनर्तित०
,,	२०	ध्वानामृतोद्‌धृत०	ध्वानामृतोद्धत०
२०	६	निविवीष०	निविरीष०
,,	१०	पस्य ।	पानाम् ।
,,	१३	उदितरुचिरहासपूर्णचन्द्रा०	तदतिरुचिरमन्दहासचन्द्रा०
,,	१७	तदतिरुचिर०	तदतिललित०
,,	२२	लालसानाम्०	लालसाभ्याम०
,,	२४	म्बुजानाम्०	म्बुजाभ्याम्०
२१	२०	समाधिस्थान्०	समाधिना०
,,	२३	मुख्यान्०	मुख्या०
२३	१०	मष्टधा०	मष्टशा०
२४	७	विभूत्याङ्कान्तं०	विभूत्याद्यङ्कान्तं०
,,	२४	मुखवासं दत्त्वा०	मुखवासाद्यं दत्त्वा०
२५	११	समर्पयेत्०	समापयेत्०
,,	१३	य इदं जपते विधिवन्नरो०	य इमं जपते विधिं नरो०
२६	२	उशीर०	सशीत०
,,	६	सेवकर्म०	सेरकर्म०
,,	७	तत्तदा०	तद्वद०
३०	१२	श्वमुख्यौ०	श्ममुख्यौ०
,,	१५	संपूज्या०	संपूज्याः०
,,	२०	स्मर्या०	स्मार्या इति शुद्धपाठः ।
३२	४	गणौघ०	गणोस्र०
,,	६	शम्पा०	चम्पा०
,,	१८	कृष्णपूजाम्०	पुष्पपूजाम्०
,,	२२	वार्ष्णेय०	वार्ष्णेय०

पृष्ठसं०	पंक्तिसं०		
३४	११	मध्यमा०	मध्यमाः०
३५	११	दन्तपवना०	दन्तधवना०
३६	२	स्वधामताम्०	सुधात्मताम्०
,,	१०	प्रतृप्त्यै०	प्रसत्त्यै०
,,	११	परीत्य०	प्रतर्प्य०
,,	२१	तेनाभिनील०	तेनाभिलीन०
३७	१	मन्त्रार्णैः०	मन्त्रान्तैः०
,,	२	परिधृत०	परिहित०
,,	६	वर्मणोऽस्य०	वर्ष्मणोस्य०
,,	६	प्रसाधितं०	प्रसादितम्०
,,	१६	संभोजयेत्०	संतोषयेत्०
३८	१४	जपाद्भिः०	जप्त्वाद्भिः०
,,	१६	जप्तं जलाद्यम्०	जाताञ्जनाद्य०
,,	२०	चेत्यदानः०	चाददानः०
३६	४	माज्ञान्यतरं०	मार्गान्यतरं०
,,	२०	भक्तिभावनम्र०	भक्तिभरावनम्र०
४०	१८	धाम्ना०	दाम्ना०
४२	४	मुदारवेणुम्०	मुदारवेषम्०
,,	१२	सर्पिर्युतैः०	सर्पिःप्लुतैः०
४३	२४	शैलेयं०	शैनेयं०
४४	१७	नीरजमूल०	नीरजसून०
४५	६	वासविहार०	रासविहार०
,,	१०	दयिताकुल०	दयितागल०
,,	१२	ज्वलिताकु०······युजम्०	ज्वलिताङ्ग०······युजाम्०
,,	१४	तालगणैः०	तानगणैः०
४६	६	वदनं सुविलासविलास०	वसनं सुविलासनिवास०
,,	२०	सरमावदनं०	सरमामदनं०
,,	२१	मिथुनार्धम०	मिथुनाह्वम०

पृष्ठसं०	पंक्तिसं०		
४७	१६	वै फलं स्यात्०	यैः फलं तत्०
४८	६	तर्पयेदेकत०	तर्पयेदेकैकश०
,,	१२	रजस्वला मोदका०	रजस्वला वोचामोदका०
४६	१०	षडर्णद्विशः०	षडर्णं द्विशः०
,,	११	पूर्वकालि०	पूर्वकानि०
५०	४	शालग्रामे मनौ०	शालिग्रामे मणौ०
५१	३	जाताम्बुदप्रभम्०	जातं द्युसप्रभम्०
,,	१२	पूर्वकः०	पूर्वकाः०
,,	१५	ङ्कगम् । चलद्दोचार०	ङ्कके । बलदोश्चर०
,,	१६	मरुल्लसित०	मरुन्नमित०
५२	५	अमुना वान्नरूप०	अमुना बालरूप०
,,	७	प्रस्नातः पञ्चगव्याद्भि०	प्रस्नातपञ्चगव्याभिः०
५३	५	पुरुषोत्तमम् ।	पुरुषोत्तम०
,,	१०	महानन्दप्रति०	महानन्दप्रीति०
,,	१८	च गोपालपदं०	गोपालकपदं०
,,	१६	शिखास्या०	शिरांस्य०
,,	२१	गोपाल०	गोबाल०
,,	२३	फणामध्ये०	फणारङ्के०
५४	४	कालिमध्येत्य यस्यान्ते फणामध्ये द्विवर्णकान्०	काव्यमध्ये लियस्यान्ते फणामध्ये दिवर्णकान्०
,,	१२	कर्तव्या०	विषघ्नी०
,,	२१	लोनैरयुत०	लोणैरयुत०
,,	२३	उच्छीकर०	तच्छीकर०
५५	२	आद्यमेव०	अमुमेव०
,,	५	भिष्णुत०	भिष्टुत०
,,	१४	सुतं०	सुतान्०
५६	११	द्विष्टयो०	इष्टयो०
,,	२३	प्रजपेद्रात्रौ०	प्रयतो रात्रौ०

पृष्ठसं०	पंक्तिसं०		
५८	८	धारस्य०	सुधस्य०
,,	१०	संकाशं०	संकाश ०
,,	१६	मृष्टता०	मुष्णता०
५९	५	धनैर्धराम् ०	धनैर्हरिम् ०
६३	१७	पयसपङ्कं०	पायसपक्कं०
,,	१९	नखसदुद्दाम०	नखमत्युद्दाम०
६६	५	दण्डधरो०	दण्डावधौ०
,,	७	विष्णुरित्युक्तो०	विष्ण इत्युक्त्वा०
,,	२४	स्तमा०	स्ता आ०
६८	७	गुरुपत्नीः०	गुरुपङ्क्तिं०
,,	१६	दामाद्यर्च्यास्तु किंकिणी०	वह्न्याद्यं किंकिणी तथा०
६९	१	गोपीभ्यश्च रसप्रदम्०	गोभ्यश्च घवसप्रदः०
७२	३	लोलालकान्तं०	नीलालकान्तं०
,,	४	गदाकल्प०	गलाकल्प०

अथ

क्रमदीपिका

प्रथमः पटलः ।

श्रीगणेशाय नमः

कलात्तमायालवकान्तमूर्तिः
  क्वणत्क्वणद्वेणुनिनादरम्यः ।
श्रितो हृदि व्याकुलयंस्त्रिलोकीं
  श्रियेऽस्तु गोपीजनवल्लभो वः ॥ १ ॥

गुरुचरणसरोरुहद्वयोत्थान्
  महितरजःकणकान् (प्रणम्य) मूर्ध्ना ।
गदितमिह विविच्य नारदाद्यै-
  र्यजनविधिं कथयामि शार्ङ्गपाणेः ॥ २ ॥

क्षितिसुरनृपविट्तुरीयजानां
  मुनिवनवासिगृहस्थव(र्णा?र्णि)नां च ।
जपहुतयजनादिभिर्मनूनां
  फलति हि कश्चन कस्यचित् कथंचित् ॥ ३ ॥

सर्वे(षु) वर्णेषु तथाश्रमेषु
  नारीषु नानाह्वयजन्म(भे?जे)षु ।
दाता फलानामभिवाञ्छितानां
  द्रागेव गोपालकमन्त्र एषः ॥ ४ ॥

(न्यू ? नू)नमच्युतकटाक्षपातने
कारणं भवति भक्तिरञ्जसा ।
तच्चतुष्टयफलाप्तये ततो
भक्तिमानधिकृ(तौ ? तो) हरौ गुरौ ॥ ५ ॥

स्नातो निर्मलसूक्ष्मशुद्धवसनो धौताङ्घ्रिपाण्याननः
स्वाचान्तः सुपवित्रमुद्रितकरः श्वेतोर्ध्वपुण्ड्रोज्ज्वलः ।
प्राचीदिग्वदनो निबध्य सुदृढं पद्मासनं स्वस्तिकं
स्वासीनः स्वगुरून् गणाधिपमथो वन्देत बद्धाञ्जलिः ॥ ६ ॥

ततोऽस्त्रमन्त्रेण विशोध्य पाणी
त्रितालदिग्बन्धहुताशशालान् ।
विधाय भूतात्मकमेतदङ्गं
विशोधयेच्छुद्धमतिः क्रमेण ॥ ७ ॥

इडावक्त्रे धूम्रं सततगतिबीजं सलवकं
स्मरेत्पूर्वं मन्त्री सकलभुवनोच्छोषणकरम् ।
स्वकं देहं तेन प्रततवपुषापूर्य सकलं
विशोष्य व्यामुञ्चेत् पवनमथ मार्गेण स्वमणेः ॥ ८ ॥

तेनैव मार्गेण विलीनमारुतं
बीजं विचिन्त्यारुणमाशुशुक्षणेः ।
आपूर्य देहं परिदह्य वामतो
मुञ्चेत् समीरं सह भस्मना बहिः ॥ ९ ॥

टपरमतीव शुभ्रममृतांशुपथेन विधुं
नयतु ललाटचन्द्रममुतः सकलार्णमयीम् ।
लपरजपाग्निपाल्य रचयेच्च तया सकलं
वपुरमृतौघवृष्टिमथ वक्त्रकराद्यमिदम् ॥ १० ॥

शिरोवदनवृत्तदृक्श्रवणघोणगण्डोष्ठद-
'न्तयुत्तु सशिरोमुखे(षु?ष्व) च इति क्रमाद्विन्यसेत् ।
हलश्च करपादसन्धिषु तदग्रकेष्वादरात्
सपार्श्वयुगपृष्ठनाभ्युदरकेषु याद्यानथ ॥ ११ ॥
हृदयकक्षककुत्करमूलदोः-
पदयुगोदरवक्त्रगतान् बुधः ।
हृदयपूर्वमनेन पथान्वहं
न्यसतु शुद्धकलेवरसिद्धये ॥ १२ ॥
इत्यारचय्य वपुरर्णशतार्धकेन
सार्धक्षपेशसविसर्गक(शो ? सो)भयैस्तैः ।
विन्यस्य केशवपुरःसरमूर्तियुक्तैः
कीर्त्यादिशक्तिसहितैर्न्यसतु क्रमेण ॥ १३ ॥
अथ कथयाम्यर्णानां मूर्तीः शक्तीः समस्तभुवनमयीः ।
केशवकीर्ती नारायणकान्ती माधवस्तथा तुष्टिः ॥ १४ ॥
गोविन्दः पुष्टियुतो विष्णुधृती सूदनश्च मध्वाद्यः ।
शान्तिस्त्रिविक्रमश्च क्रिया पुनर्वामनो दयायुक्तः ॥ १५ ॥
श्रीधरयुता च मेधा हृषीकनाथश्च हर्षया युक्तः ।
अम्बुजनाभश्रद्धे दामोदरसंयुता पुनर्लज्जा ॥ १६ ॥
लक्ष्मीः सवासुदेवा संकर्षणः सरस्वतीयुक्तः ।
प्रद्युम्नः प्रीतिसमेतोऽनिरुद्धको रतिरिमाः स्वरोपेताः ॥ १७ ॥
चक्रिजये गदिदुर्गे शार्ङ्गी प्रभयान्वितस्तथा खड्गी ।
सत्या शंखी चण्डा हलिवाण्यौ मुसलियुग्विलासिनिका ॥ १८ ॥
शूली विजया पाशी विरजा विश्वान्वितोऽङ्कुशी भूयः ।
विनदा मुकुन्दयुक्ता नन्दजसुनदे स्मृतिश्च नान्दियुता ॥ १९ ॥

---

१ 'न्तद्वयेषु' कः पाठः ।

नरऋद्धी नरकजिता समृद्धिरथ शुद्धियुग् हरिः ।
कृष्णो बुद्धियुतः सत्ययुता शक्तिर्मतियुक् सात्त्वतः शौरिः ॥ २० ॥

क्षमया शूरो रमया जनार्दनो मा च भूधरः क्लेदिनी ।
विश्वादिमूर्तियुता क्लिन्ना वैकुण्ठयुक् तथा वसुदा ॥ २१ ॥

पुरुषोत्तमश्च वसुधा वलिना च परा बलानुजोपेता ।
भूयः परायणाख्या बालः सूक्ष्मा वृषघ्नसंध्ये च ॥ २२ ॥

सवृषा प्रज्ञा हंसा प्रभा वराहो निशा च विमलोऽमोघा ।
नरसिंहविद्युती च प्रणिगदिता मूर्तयो हलानां शक्तियुताः ॥ २३ ॥

वर्णानुक्त्वा सार्धचन्द्रान् पुरस्तान्
मूर्तीः शक्तीर्ङेवसाना नतिं च ।
उक्त्वा न्यसेद्यादिभिः सप्त धातून्
प्राणं शक्तिं क्रोधमप्यात्मनेऽन्तान् ॥ २४ ॥

उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदातं
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम् ।
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं
विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिम् ॥ २५ ॥

ध्यात्वैवं परमपुमांसमक्षरैर्यो
विन्यस्येद् दिनमनु केशवादि[1]युक्तैः ।
मेधायुःस्मृतिधृतिकान्तिकीर्तिलक्ष्मी-
सौभाग्यैश्चिरमुपबृंहितो भवेत् सः ॥ २६ ॥

अयमेव रमापुरःसरं
प्रभजेद्यो मनुजो विधिं बुधः
समुपेत्य रमां प्रथीयसीं
पुनरन्ते हरितां व्रजत्यसौ ॥ २७ ॥

---

१ ‘दिकीर्तियु’ कः पाठः ।

इत्यच्युतीकृततनुर्विदधीत तत्त्व-
न्यासं मपूर्वकपरात्त्वरनत्युपेतम् ।
भूयः पराय च तदाह्वयमात्मने च
नत्यन्तमुद्धरतु तत्त्वमनून् क्रमेण ॥ २८ ॥

सकलवपुषि जीवं प्राणमायोज्य मध्ये
न्यसतु मतिमहंकारं मनश्चेति (य!म) न्त्री ।
कमुखहृदयगुह्याङ्घ्रिष्वथो शब्दपूर्वं
गुणगणमथ कर्णादिस्थितं श्रोत्रपूर्वम् ॥ २९ ॥

वागादीन्द्रियवर्गमात्मनिलयेष्वाकाशपूर्वं गणं
मूर्ध्न्यास्ये हृदये शिवे चरणयोर्हृत्पुडरीकं हृदि ।
बिम्बानि द्विषडष्टयुगूदशकलाव्याप्तानि सूर्योडुराड्-
वह्नीनां न्यसतात् तु भूतवसुमुन्यद्व्यत्त्वरैर्मन्त्रवित् ॥ ३० ॥

अथ परमेष्ठिपुमांसौ विश्वनिवृत्ती च सर्व इत्युपनिषदः ।
न्यसेदाकाशादिस्थानेषु यरलवळार्णैः सलवकैः ॥ ३१ ॥

वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः ।
नारायणश्च क्रमशः परमेष्ठ्यादिभि(र्म ? र्यु)ताः ॥ ३२ ॥

ततः कोपतत्त्वं त्त्वरौबिन्दुयुक्तं
नृसिंहं न्यसेत् सर्वगात्रेषु तज्ज्ञः ।
क्रमेणेति तत्त्वात्मको न्यास उक्तः
(सु ? स्व)सांनिध्यकृद् विश्वमूर्त्यादिषु स्यात् ॥ ३३ ॥

इति कृतेऽधिकृतो भवति ध्रुवं
सकलवैष्णवमन्त्रजपादिषु ।
पवनसंयमनं त्वमुना चरेत्
यमिह जप्तुमसौ मनुमिच्छति ॥ ३४ ॥

अथवाखिलेषु हरिमन्त्रजपविधिषु मूलमन्त्रतः ।
संयमनममलधीर्मरुतो विधिनाभ्यसंश्चरतु तत्त्वसंख्यया ॥ ३५ ॥

पुरतो जपस्य परतोऽपि विहितमथ तांत्रिकं बुधैः ।
षोडश य इह चरेद् दिनशः परिपूयते स खलु मासतोंऽहसः ॥ ३६ ॥

अथवाङ्गजन्ममनुनाऽसुसंयमनं
सकलेषु कृष्णमनुजापकर्मसु ।
सहितैकसप्तकृतिवारमभ्यसं-
स्तनुयात् समस्तदुरितापहारिणा ॥ ३७ ॥

अष्टाविंशतिसंख्यमिष्टफलदं मन्त्रं दशार्णं जप-
न्नायच्छेत् पवनं सुशंसितमतिस्त्वष्टादशार्णेन चेत् ।
अभ्यस्यन् रविवारमन्यमनुभिर्वर्णानुरूपं जपन्
कुर्यात् रेचकपूरकं सुनिपुणः प्राणप्रयोगं नरः ॥ ३८ ॥

रेचयेन्मारुतं दक्षया दक्षिणः
पूरयेद्वामया मध्यनाड्या पुनः ।
धारयेदीरितं रेचकादित्रयं
स्यात्कलादण्डविद्याख्यमात्रात्मकम् ॥ ३९ ॥

प्राणायामं विधायेत्यथ निजवपुषा कल्पयेद्योगपीठं
न्यस्येदाधारशक्तिप्रकृतिकमठशेषक्ष्माक्षीरसिन्धून् ।
श्वेतद्वीपं च रत्नोज्ज्वलसहितमहामण्डपं कल्पवृक्षं
हृद्देशेंऽसद्वयोरुद्वयवदनकटीपार्श्वयुग्मेषु भूयः ॥ ४० ॥

धर्माद्यधर्मादि च पादगात्र-
चतुष्टयं हृद्यथ शेषमब्जम् ।
सूर्येन्दुवह्नीन् प्रणवांशयुक्तान्
स्वाद्यक्षरैः सत्त्वरजस्तमांसि ॥ ४१ ॥

आत्मादित्रयमादिबीजसहितं व्योमाग्निमायालवै-
र्ज्ञानात्मानमथाष्टदिक्षु परितो मध्ये च शक्तीर्नव ।
न्यस्त्वा पीठमनुं च तत्र विधिवत्तत्कर्णिकामध्यगं
नित्यानन्दचितिप्रकाशममृतं संचिन्तयेद्धाम तत् ॥ ४२ ॥

विमलोत्कर्षिणी ज्ञाना क्रिया योगा च शक्तयः ।
प्रह्वी सत्या तथेशानानुग्रहा नवमी स्मृताः ॥ ४३ ॥

तारं हृदयं भगवान् विष्णुः सर्वान्वितश्च भूतात्मा ।
ङेन्ताश्च वासुदेवः सर्वात्मयुतश्च संयोगः ॥ ४४ ॥

योगावधौ पद्मपीठात्मा ङेयुतो नतिश्चान्ते ।
पीठमहामनुरुक्तः पर्याप्तोऽयं सपर्यासु ॥ ४५ ॥


करयोर्युगलं विधाय मन्त्रा-
त्मकमाभ्यामभिधास्यमानमार्गात् ।
सकलं विदधीत मन्त्रवर्णैः
परमं ज्योतिरनुत्तमं हरेस्तत् ॥ ४६ ॥

इति श्रीक्रमदीपिकायां (देहशुद्धि-न्यासपीठन्यासविधिनिरूपणं नाम)
प्रथमः पटलः सम्पूर्णः ॥ १ ॥



अथ

द्वितीयः पटलः ।



वक्ष्ये मनुं त्रिभुवनप्रथितानुभाव-
मक्षीणपुण्यनिचयैर्मुनिभिर्विमृग्यम् ।
पक्षीन्द्रकेतुविषयं वसुधर्मकाम-
मोक्षप्रदं सकलकार्मणकर्मदक्षम् ॥ १ ॥

अतिगुह्यमबोधतूलराशि-
ज्वलनं वागधिपत्वदं नराणाम् ।
दुरितापहरं विषापमृत्यु-
ग्रहरोगार्तिनिवारणैकहेतुम् ॥ २ ॥

जयदं प्रधनेऽभयदं विपिने
सलिलप्लवने सुखतारणदम् ।
नरसप्तिरथद्विपवृद्धिकरं
सुतगोधरणीधनधान्यकरम् ॥ ३ ॥

बलवीर्यशौर्यनिचयप्रतिभा-
स्वरदेहकान्तिसुभगत्वकरम् ।
क्षुभिताण्डकोटिमणिमादिगुणा-
ष्टकदं किमत्र बहुनाखिलदम् ॥ ४ ॥

शार्ङ्गी सोत्तरदन्तः शूरो वामाक्षियुक् द्वितीयार्णः ।
शूली शौरिर्बालो बलानुजद्वयमथाक्षरचतुष्टयम् ॥ ५ ॥

शूरतुरीयः साननवृत्तः स्यात्सप्तमोऽष्टमोऽग्निमथः ।
तद्दयिताक्षरयुग्मं तदुपरिगं त्वेवमुद्धरेन्मन्त्रम् ॥ ६ ॥

प्रकाशितो दशाक्षरो मनुस्त्वयं मधुद्विषः ।
विशेषतः पदारबिन्दयुग्मभक्तिवर्धनः ॥ ७ ॥

नारदो मुनिरमुष्य कीर्तित-
श्छन्द उक्तमृषिभिर्विराडपि ।
देवता सकललोकमङ्गलो
नन्दगोपतनयः समीरितः ॥ ८ ॥

अङ्गानि पञ्च हुतभुग्दयितासमेतै-
श्चक्रैरमुष्य मुखवृत्तविरूपपन्नैः ।
त्रैलोक्यरक्षणयुजाप्यसुरान्तकाख्य-
पूर्वेण चेति कथितानि विभक्तियुक्तैः ॥ ९ ॥

हृदये नतिः शिरसि पावकप्रिया
सवषट् शिखा हुमिति वर्मणि स्मृतम् ।
सफडस्त्रमित्युदितमङ्गपञ्चकं
सचतुर्थिवौषडुदितं दृशौ यदि ॥ १० ॥

मन्त्रार्णैर्दशभिरुपेतचन्द्रखण्डै-
रङ्गानां दशकमुदीरितं नमोऽन्तम् ।
हृच्छीर्षं तदनु शिखा तनुत्रमस्त्रं
पार्श्वद्वन्द्वसकटिपृष्ठमूर्[1]धयुक्तम् ॥ ११ ॥

वक्ष्ये मन्त्रस्यास्य बीजं सशक्ति
चक्री शक्री वामनेत्रप्रदीप्तः ।
सप्रद्युम्नो बीजमेतत्प्रदिष्टं
मन्त्रः प्रद्युम्नो जगन्मोहनोऽयम् ॥ १२ ॥

---

१ 'र्घ्वं' पाठः ।

हंसो मेदोवक्त्रवृत्ताभ्युपेतः
पोत्री नेत्राद्यन्वितोऽसौ युगार्णा ।
प्रोक्ता शक्तिः सर्वगीर्वाणवृन्दै-
र्वन्द्यस्याग्नेर्वल्लभा कामदेयम् ॥ १३ ॥

विनियोगोऽस्य मन्त्रस्य पुरुषार्थचतुष्टये ।
कृष्णः प्रकृतिरित्युक्तो दुर्गाधिष्ठातृदेवता ॥ १४ ॥

गोपायति सकलमिदं गोपायति परमपुमांसमिति ।
गोपी प्रकृतिस्तस्यां जातं जन इति महदादिकं पृथिव्यन्तम् ॥ १५ ॥

अनयोर्गोपीजनयोः समीरणादाश्रयत्वतो व्याप्ता ।
वल्लभ इत्युपदिष्टं सान्द्रानन्दं निरञ्जनं ज्योतिः ॥ १६ ॥

स्वाहेति स्वात्मानं गमयामीति स्वतेजसे तस्मै ।
यः कार्यकारणेशः परमात्मेत्यच्युतैकतास्य भवेत् ॥ १७ ॥

अथवा गोपीजन इति समस्तजगदवनशक्तिसमुदायः ।
तस्य स्वानन्यस्य स्वामी वल्लभ इतीह निर्दिष्टः ॥ १८ ॥

अथवा व्रजयुवतीनां दयिताय जुहोमि मां मदीयमपि ।
इत्यर्पयेत् समस्तं ब्रह्मणि सगुणे समस्तसंपत्त्यै ॥ १९ ॥

कृषशब्दः सत्तार्थो णश्चानन्दात्मकस्ततः कृष्णः ।
भक्ताघकर्षणादपि तद्वर्णत्वाच्च मन्त्रमयवपुषः ॥ २० ॥

गौः शब्दवाचकत्वाज् ज्ञानं तेनोपलभ्यत इति गोविन्दः ।
वेत्तीति शब्दराशिं गोविन्दो गोविचारणादपि नोक्तः ॥ २१ ॥

एतेऽभिमुखोऽनुक्रमतस्तुर्य्यविभक्त्या
मन्त्रात्पूर्वं मन्मथबीजादथ पश्चात् ।
स्यातां चेदष्टादशवर्णो मनुवर्यो
गुह्याद्गुह्यो वाञ्छितचिन्तामणिरेषः ॥ २२ ॥

पूर्वप्रदिष्टे मुनिदेवतेऽस्य
च्छन्दस्तु गायत्र्यमुशन्ति सन्तः ।
अङ्गानि मन्त्रार्णचतुश्चतुष्कै-
वर्मावसानानि युगार्णमस्त्रम् ॥ २३ ॥

बीजं शक्तिः प्रकृतिर्विनियोगश्चापि पूर्ववदमुष्य ।
पूर्वतरस्य मनोरथ कथयामि न्यासमखिलसिद्धिकरम् ॥ २४ ॥

व्यापय्याथो हस्तयोर्मन्त्रमन्त-
र्बाह्ये पार्श्वेताररुद्धं बुधेन ।
न्यासो वर्णैस्तारयुग्मान्तरस्थै-
र्बिन्दूत्तंसैर्हार्दिकृत्यैर्विधेयः ॥ २५ ॥

शाखासु त्रीणि पर्वाण्यधि दशसु पृथग्दक्षिणाङ्गुष्ठपूर्वं
वामाङ्गुष्ठावसानं न्यसतु विशदधीः सृष्टिरुक्ता करस्था ।
अङ्गुष्ठद्वन्द्वपूर्वा स्थितिरुभयकरे संहृतिर्वामपूर्वा
दक्षाङ्गुष्ठान्तिकैतत् त्रयमपि सृजति स्थित्युपेतं च कार्यम् ॥ २६ ॥

ततः स्थितिक्रमाद् बुधो दशाङ्गकानि विन्यसेत् ।
तदङ्गपञ्चकं तथा विधिः समीरितः करे ॥ २७ ॥

पुटितैर्मनुनाथ मातृकार्णै-
रभिविन्यस्य सबिन्दुभिः पुरोवत् ।
अनुसंहृतिसृष्टिमार्गभेदाद्-
दशतत्त्वानि च मन्त्रवर्णभाञ्जि ॥ २८ ॥

संहृतावनुगतो मनुवर्य्यः
सृष्टिवर्त्मनि भवेत् प्रतिघातः ।
उद्धृतिः खलु पुरोक्तवदेषां
न्यासकर्म कथयाम्यधुनाहम् ॥ २९ ॥

महीसलिलपावकानिलवियन्ति गर्वो महान्
पुनः प्रकृतिपूरुषौ पर इमानि तत्त्वान्यथ ।
पदान्धुहृदयास्यकान्यधि तु पञ्च मध्ये द्वयं
त्रयं सकलगं ततो न्यसतु तद्विपर्यासतः ॥ ३० ॥

गुप्ततमोऽयं न्यासः संप्रोक्तस्तत्त्वदशकपरिक्लृप्तः ।
कार्योऽन्येष्वपि सद्भिर्गोपालकमनुषु झटिति फलसिद्ध्यै ॥ ३१ ॥

आकेशादापादाद् दोर्भ्यां ध्रुवपुटितमनुवरं न्यसेद्वपुषि त्रिशः ।
मूर्धन्यक्ष्णोः श्रुत्योर्घ्राणमुखहृदयजठरशिवजानुपत्सु तथाक्षराणि न्यसेत् ॥ ३२ ॥

उक्ता सृष्टिः शिष्टैः स्थितिरपि मुनिभिरभिहिता हृदादिमुखान्तिका ।
संहारोऽङ्घ्र्यादिमूर्द्धान्तस्त्रितयमिदमिति विरचयेच्च सृष्टिमनु स्थितिम् ॥ ३३ ॥

न्यासः संहारान्तो मस्करिवैखानसेषु विहितोऽयम् ।
स्थित्यन्तो गृहमेधिषु सृष्ट्यन्तो वर्णिनामिति प्राहुः ॥ ३४ ॥

वैराग्ययुजि गृहस्थे संहारं केचिदाहुराचार्याः ।
सहजानौ वनवासिनि स्थितिं च विद्यार्थिनां सृष्टिम् ॥ ३५ ॥

शिरसि विहिता मध्या सैवाक्ष्णि तर्जनिकान्विता
श्रवसि[1] रहिताङ्गुष्ठा ज्येष्ठान्वितोपकनिष्ठिका ।
नसि च वदने सर्वाः सज्यायसी हृदि तर्जनी
प्रथमजयुता मध्या नाभौ श्रवसि (?) विहिता शिवे ॥ ३६ ॥

ता एवाङ्गुलयो जान्वोः साङ्गुष्ठास्तु पदद्वये ।
स्थानार्णयोर्विनियमो नाङ्गुलिस्थानयोर्भवेत् ॥ ३७ ॥

वक्ष्म्यपरं न्यासवरं भूत्यभिधं भूतिकरम् ।
मन्त्रे दशावृत्तिमयं गुप्ततमं मन्त्रिवरैः ॥ ३८ ॥

---

१ 'वि' पाठः ।

आधारध्वजनाभिहृद्गलमुखांसोरुद्वये, कन्धरा-
नाभ्योः कुक्षिहृदोरुरोजयुगले पार्श्वापरश्रोणिषु ।
कास्याक्षिश्रुतिनःकपोलकरपत्संध्यग्रशाखासु के
तत्प्राच्यादिदिशासु मूर्ध्नि सकले दोष्णोश्च सक्थ्नोस्तथा ॥ ३९ ॥

शिरोदयास्यकण्ठाख्यहृत्तुन्दकन्दा-
न्धुजानुप्रपत्स्वित्थमर्णान् मनूत्थान् ।
न्यसेच्छ्रोत्रगण्डांसवक्षोजपार्श्व-
स्फिगूरुस्थलं जानुजङ्घांघ्रियुक्तु ॥ ४० ॥

इति कथितं विभूतिपञ्जरं
सकलसुखार्थधर्ममोक्षदम् ।
नवतरुणीमनोनुरञ्जनं
हरिचरणाम्बुजभक्तिवर्धनम् ॥ ४१ ॥

स्फूर्तयेऽथास्य मन्त्रस्य कीर्त्यते मूर्तिपञ्जरम् ।
आर्तिग्रहविषारिघ्नं कीर्तिश्रीकान्तिपुष्टिदम् ॥ ४२ ॥

केशवादियुगषट्कमूर्तिभि-
र्धातृपूर्वमिहिरान् नमोन्तिकान् ।
द्वादशाक्षरभवाक्षरैः स्वरैः
क्लीववर्णरहितैः क्रमान्न्यसेत् ॥ ४३ ॥

भालोदरहृद्गलकूपतले वामेतरपार्श्वभुजान्तगले ।
वामे[1]तरपृष्ठककुत्सु तथा मूर्द्धन्यथ षट्युगवर्णमनुम् ॥ ४४ ॥

चैतन्यामृतवपुरर्ककोटितेजा
मूर्द्धस्थो वपुरखिलं स वासुदेवः ।
ऊधस्यं सुविमलपाथसीव सिक्तं
व्याप्नोति प्रकटितमन्त्रवर्णकीर्णम् ॥ ४५ ॥

---

१ 'मत्रयपृ' कः पाठः ।

सृष्टिस्थिती दशपञ्चाङ्गयुग्मं
मुन्यादिकं त्रितयं कास्यहृत्सु ।
विन्यस्य तु ग्रथयित्वा च मुद्रां
भूयो दिशां दशकं बन्धनीयम् ॥ ४६ ॥

तारं हार्दं विश्वमूर्तिश्च शार्ङ्गी
(मांसा? मेदो)र्णान्ते वायमध्ये सुदेवा ।
षड्द्वन्द्वार्णो मन्त्रवर्यः स उक्तः
साक्षाद् द्वारं मोक्षपुर्याः सुगम्यम् ॥ ४७ ॥

धात्रर्यममित्राख्या वरुणांशुभगा विवस्वदिन्द्रयुताः ।
पूषाह्वयपर्जन्यौ त्वष्टा विष्णुश्च भानवः प्रोक्ताः ॥ ४८ ॥

अथ युगलरन्ध्रार्णस्याहं मनोर्न्यसनं ब्रुवे
रचयतु करद्वन्द्वे पञ्चाङ्गमङ्गुलिपञ्चके ।
तनुमनु मनुं व्यापय्याथ त्रिशः प्रणवं सकृत्-
मनुजलिपयो न्यस्या भूयः पदानि (च) सादरम् ॥ ४९ ॥

कचभुवि ललाटभ्रूयुग्मान्तः श्रवणाक्षियुगल-
वदनग्रीवाहृन्नाभिकट्युभयान्धुषु ।
न्यसतु सितधीर्जान्वङ्घ्योरक्षराणि शिरसि ध्रुवं
नयनहृद्गुह्यांघ्रिष्वर्पयेत् पदपञ्चकम् ॥ ५० ॥

पञ्चाङ्गानि न्यसेद्भूयो मुन्यादीनप्यन्यत्सर्वम् ।
तुल्यं पूर्वेणाथो वक्ष्ये मुद्रा बध्या मन्वोर्याः स्युः ॥ ५१ ॥

अनङ्गुष्ठा ऋजवो हस्तशाखा
भवेन्मुद्रा हृदये शीर्षके च ।
अधोङ्गुष्ठा खलु मुष्टिः शिखायां
करद्वन्द्वाङ्गुलयो वर्मणि स्युः ॥ ५२ ॥

नाराचमुष्ट्युद्गतबाहुयुग्म-
काङ्गुष्ठतर्जन्युदितो ध्वनिस्तु ।
विष्वग्विषक्तः कथितास्त्रमुद्रा
यत्राक्षिणी तर्जनीमध्यमेऽत्र ॥ ५३ ॥

ओष्ठे वामकराङ्गुष्ठो लग्नस्तस्य कनिष्ठिका ।
दक्षिणाङ्गुष्ठसंयुक्ता तत्कनिष्ठा प्रसारिता ॥ ५४ ॥

तर्जनीमध्यमानामाः किञ्चित् संकुच्य चालिताः ।
वेणुमुद्रेह कथिता सुगुप्ता प्रेयसी हरेः ॥ ५५ ॥

नोच्यन्तेऽत्र प्रसिद्धत्वान्मालाश्रीवत्सकौस्तुभाः ।
उच्यतेऽच्युतमुद्राणां भद्रा बिल्वफलाकृतिः ॥ ५६ ॥

अङ्गुष्ठं वाममुद्दण्डितमितरकराङ्गुष्ठकेनाथ बद्ध्वा
तस्याग्रं पीडयित्वाङ्गुलिभिरपि च ता वामहस्ताङ्गुलीभिः ।
बद्ध्वा गाढं हृदि स्थापयतु विमलधीर्व्याहरन् मारबीजं
बिल्वाख्या मुद्रिकैषा स्फुटमिह कथिता गोपनीया विधिज्ञैः ॥५७॥

मनोवाणीदेहैर्यदिह च पुरा वापि विहितं
त्वमत्या मत्या वा तमखिलमसौ दुष्कृतचयम् ।
इमां मुद्रां जानन् क्षिपयति नरस्तं सुरगणा
नमन्त्यस्याधीना भवति सततं सर्वजनता ॥ ५८ ॥

प्रणवहृदवसाने सचतुर्थिसुदर्शनं तथास्त्रं पदम् ।
उक्त्वा फडन्तमनुना कलयेन्मनुनास्त्रमुद्रया दश हरितः ॥ ५९ ॥


इति विधाय समस्तजगज्जनि-
स्थितिविनाशविधानविशारदम् ।

श्रुतिविमृग्यमजं मनुविग्रहं
स्मरतु गोपवधूजनवल्लभम् ॥ ६० ॥

इति श्रीक्रमदीपिकायां (गोपालमन्त्रोद्धारतन्न्यासविधिनिरूपणं नाम)
द्वितीयः पटलः सम्पूर्णः ॥ २ ॥

अथ

तृतीयः पटलः



अथ प्रकटसौरभोद्गलितमाध्विकोत्फुल्लसत्-
प्रसूननवपल्लवप्रकरनम्रशाखैर्द्रुमैः ।
प्रफुल्लनवमञ्जरीललितवल्लरीवेष्टितैः
स्मरेच्छिशिरितं शिवं सितमतिस्तु वृन्दावनम् ॥ १ ॥
विकाशिसुमनोरसास्वदनमञ्जुलैः संचर-
च्छिलीमुखमुखोद्गतैर्मुखरितान्तरं झाङ्कृतैः ।
कपोतशुकशारिकापरभृतादिभिः पत्रिभि-
र्विरावितमितस्ततो भुजगशत्रुनृत्याकुलम् ॥ २ ॥
कलिन्ददुहितुश्चलल्लहरिविप्रुषां वाहिभि-
र्विनिद्रसरसीरुहोदररजश्चयोद्धूसरैः ।
प्रदीपितमनोभवव्रजविलासिनीवाससां
विलोलनपरैर्निषेवितमनारतं मारुतैः ॥ ३ ॥

प्रवालनवपल्लवं मरकतच्छदं वज्रमौ-
क्तिकप्रकरकोरकं कमलरागनानाफलम् ।
स्थविष्ठमखिलर्तुभिः सततसेवितं कामदं
तदन्तरपि कल्पकाङ्घ्रिपमुदञ्चितं चिन्तयेत् ॥ ४ ॥

सहेमशिखरावलेरुदितभानु(भा)भास्वरा-
मधोऽस्य कनकस्थलीममृतशीकरास्राविणः ।
प्रदीप्तमणिकुट्टिमां कुसुमरेणुपुञ्जोज्ज्वलां
स्मरेत् पुनरतन्द्रितो विगतषट्तरङ्गं बुधः ॥ ५ ॥

तद्रत्नकुट्टिमनिविष्टमहिष्ठयोग-
पीठेऽष्टपत्रमरुणं कमलं विचिन्त्य ।
उद्यद्विरोचनसरोचिममुष्य मध्ये
संचिन्तयेत् सुखनिविष्टमथो मुकुन्दम् ॥ ६ ॥

सुत्रामरत्नदलिताञ्जनमेघपुञ्ज-
प्रत्यग्रनीलजलजन्मसमानभासम् ।
सुस्निग्धनीलघनकुञ्चितकेशजालं
राजन्मनोज्ञशितिकण्ठशिखण्डचूडम् ॥ ७ ॥

रोलम्बलालितसुरद्रुमसूनकल्पि-
तोत्तंसमुत्कचनवोत्पलकर्णपूरम् ।
लोलालकस्फुरितभालतलप्रदीप्त-
गोरोचनातिलकमुज्ज्वलचित्रमालम् ॥ ८ ॥

आपूर्णशारदगताङ्कशशाङ्कबिम्ब-
कान्ताननं कमलपत्रविशालनेत्रम् ।
रत्नस्फुरन्मकरकुण्डलरश्मिदीप्त-
गण्डस्थलीमधुरमुन्नतचारुनासम् ॥ ९ ॥

सिन्दूरसुन्दरतराधरमिन्दुकुन्द-
मन्दारमन्दहसितद्युतिदीपिताशम् ।
वन्यप्रवालकुसुमप्रचयावक्लृप्त-
ग्रैवेयकोज्ज्वलमनोहरकम्बुकण्ठम् ॥ १० ॥

मत्तभ्रमद्भ्रमरजुष्टविलम्बमान-
संतानकप्रसव[१]दामपरिष्कृतांसम् ।
हारावलीभगणराजितपीवरोरो-
व्योमस्थलीलसितकौस्तुभभानुमन्तम् ॥ ११ ॥

श्रीवत्सलक्षणसुलक्षितमुन्नतांस-
माजानुपीनपरिवृत्तसुजातबाहुम् ।
आबन्धुरोदरमुदारगभीरनाभिं
भृङ्गाङ्गनानिकरमञ्जुलरोमराजिम् ॥ १२ ॥

नानामणिप्रघटिताङ्गदकङ्कणोर्मि-
ग्रैवेयसारसननूपुरतुन्दबन्धम ।
दिव्याङ्गरागपरिपिञ्जरिताङ्गयष्टि-
मापीतवस्त्रपरिवीतनितम्बबिम्बम् ॥ १३ ॥

चारूरुजानुमनुवृत्तमनोज्ञजङ्घं
कान्तोन्नतप्रपदनिन्दितकूर्मकान्तिम् ।
माणिक्यदर्पणलसन्नखराजिराजद्-
रक्ताङ्गुलिच्छदनसुन्दरपादपद्मम् ॥ १४ ॥

मत्स्याङ्कुशादिदरकेतु(जवा ? गदा)ब्जवज्र-
संलक्षितारुणतराङ्घ्रितलाभिरामम् ।
लावण्यसारसमुदायविनिर्मिताङ्ग-
सौन्दर्यनिन्दितमनोभवदेहकान्तिम् ॥ १५ ॥

१ 'र' क. पाठः ।

आस्यारविन्दपरिपूरितवेणुरन्ध्र-
लोलत्कराङ्गुलिसमीरितदिव्यरागैः ।
शश्वद्द्रवीकृतविकृष्टसमस्तजन्तु-
संतानसंततिमनन्तसुखाम्बुराशिम् ॥ १६ ॥

गोभिर्मुखाम्बुजविलीनविलोचनाभि-
रूधोभरस्खलितमन्थरमन्दगाभिः ।
दन्ताग्रदष्टपरिशिष्टतृणाङ्कुराभि-
रालम्बिवालधिलताभिरथाभिवीतम् ॥ १७ ॥

सप्रस्रवस्तनविचूषणपूर्णनिश्च-
लास्यावगाढसृ[1]तफेनिलदुग्धमुग्धैः ।
वेणुप्रवर्तितमनोहरमन्दगीति-
दत्तोच्चकर्णयुगलैरपि तार्णकैश्च ॥ १८ ॥

प्रत्यग्रशृङ्गमृदुमस्तकसंप्रहार-
संरम्भवल्गनविलोलखुराग्रपातैः ।
आमेदुरैर्बहलसास्नगलैरुदग्र-
पुच्छैश्च वत्सतरवत्सतरीनिकायैः ॥ १९ ॥

हंभारवक्षुभितदिग्वलयैर्महद्भि-
रप्युक्षभिः पृथुककुद्भरभारखिन्नैः ।
उत्तम्भितश्रुतिपुटीपरिपीतवंश-
ध्वानामृतोद्धृतविकासिविशालघोणैः ॥ २० ॥

गोपैः समानगुणशीलवयोविलास-
वेशैश्च मूर्च्छितकलस्वनवेणुवीणैः ।
मन्द्रोच्चतालपुटगानपरैर्विलोल-
दोर्वल्लरीलसितलास्यविधानदक्षैः ॥ २१ ॥

---

१ 'ढच्चरित' क. पाठः ।

जङ्घान्तपीवरकटीरतटीनिबद्ध-
व्यालोलकिङ्किणिघटारणितै रटद्भिः ।
मुग्धैस्तरक्षुनखकल्पितकण्ठभूषै-
रव्यक्तमञ्जुवचनैः पृथुकैः परीतम् ॥ २२ ॥

अथ सुललितगोपसुन्दरीणां
पृथु(निविवीष ? विनिवेश)नितम्ब[1]मन्थराणाम् ।
गुरुकुचभरभङ्गुरावलग्न-
त्रिवलिविजृम्भितरोमराजिभाजाम् ॥ २३ ॥

तदतिरुचिरचारुवेणुवाद्या-
मृतरसपल्लविताङ्गजाङ्घ्रिपस्य ।
मुकुलविसररम्यरूढरोमो-
द्गमसमलङ्कृतगात्रवल्लरीणाम् ॥ २४ ॥

उदितरुचिरहास(पूर्ण)चन्द्रा-
तपपरिजृम्भितरागवारिराशेः ।
तरलतरतरङ्गभङ्गविप्रुट्-
प्रकरसमश्रमबिन्दुसंततानाम् ॥ २५ ॥

तदतिरुचिरमन्दचिल्लिचाप-
च्युतनिशितेक्षणमारबाणवृष्ट्या ।
दलितसकलमर्मविह्वलाङ्ग-
परिस्रुतदुःसहवेपथुव्यथानाम् ॥ २६ ॥

तदतिसुभगकम्ररूपशोभा-
मृतरसपानविधानलालसानाम् ।
प्रणयसलिलपूरवाहिनीना-
मलसविलोलविलोचनाम्बुजानाम् ॥ २७ ॥

---

१ 'म्ब भार' क. पाठः ।

विस्रंसत्कवरीकलापविगलत्फुल्लप्रसूनस्रवन्-
माध्वीलम्पटचञ्चरीकघटया संसेवितानां मुहुः ।
मारोन्मादमदस्खलन्मृदुगिरामालोलकाञ्च्युच्छ्वसन्-
नीवीविश्लथमानचीनसिचयान्ताविर्नितम्बत्विषाम् ॥ २८॥

स्खलितललितपादाम्भोजमन्दाभिघात-
क्वणितमणितुलाकोट्याकुलाशामुखानाम् ।
चलदधरदलानां कुट्मल(त्)पक्ष्मलाक्षि-
द्वयसरसिरुहाणामुल्लसत्कुण्डलानाम् ॥ २९ ॥

द्राघिष्ठश्वसनसमीरणाभिताप-
प्रम्लानीभवदरुणोष्ठपल्लवानाम् ।
नानोपायनविलसत्कराम्बुजाना-
मालीभिः सततनिषेवितं समन्तात् ॥ ३० ॥

तासामायतलोलनीलनयनव्याकोषनीलोत्पल-
स्रग्भिः संपरिपूरिताखिलतनुं नानाविलासास्पदम् ।
तन्मुग्धाननपङ्कजप्रविलसन्माध्वीरसास्वादिनीं
बिभ्राणं प्र(ल?ण)योन्मदाक्षिमधुकृन्मालां मनोहारिणीम् ॥ ३१ ॥

गोपीगोपपशूनां बहिः स्मरेदग्रतोऽस्य गीर्वाणघटाम् ।
वित्तार्थिनीं विरिञ्चित्रिनयनशतमन्युपूर्विकां स्तोत्रपराम् ॥ ३२ ॥

तद्वद् दक्षिणतो मुनिनिकरं वसुधर्मवाञ्छयाम्नायपरम् ।
योगीन्द्रनाथपृष्ठे मुमुक्षमाणान् समाधिस्थान् सनकाद्यान् ॥ ३३ ॥

सव्ये सकान्तानथ यक्षसिद्ध-
गन्धर्वविद्याधरचारणांश्च ।
सकिन्नरानप्सरसश्च मुख्यान्
कामार्थिनो नर्तितगीतवाद्यैः ॥ ३४ ॥

शङ्खेन्दुकुन्दधवलं सकलागमज्ञं
सौदामिनीततिपिशङ्गजटाकलापम् ।
तत्पादपङ्कजगतामचलां च भक्तिं
वाञ्छन्तमुज्झिततरान्यसमस्तसङ्गम् ॥ ३५ ॥

नानाविधश्रुतिगुणान्वितसप्तराग-
ग्रामत्रयीगतमनोहरमूर्च्छनाभिः ।
संप्रीणयन्तमुदिताभिरमुं महत्या
संचिन्तयेन्नभसि धातृसुतं मुनीन्द्रम् ॥ ३६ ॥

इति ध्यात्वात्मानं पटुविशदधीर्नन्दतनयं
पुरो बुद्ध्यैवार्घ्यप्रभृतिभिरनिन्द्योपहृतिभिः ।
यजेद्भूयो भक्त्या स्ववपुषि बहिष्ठैश्च विभवै-
र्विधानं तद्ब्रूमो वयमतुलसांनिध्यदमथ ॥ ३७ ॥

आरचय्य भुवि गोमयाम्भसा
स्थण्डिलं निजममुत्र विष्टरम् ।
न्यस्य तत्र विहितास्पदोऽम्भसा
शङ्खमस्त्रमनुना विशोधयेत् ॥ ३८ ॥

तत्र गन्धसुमनोऽक्षतानथो
निक्षिपेद् हृदयमन्त्रमुच्चरन् ।
पूरयेद्विमलपाथसा सुधी-
रक्षरैः प्रतिगतैः शिरोन्तिकैः ॥ ३९ ॥

पीठशङ्खसलिलेषु मन्त्रविद्-
वह्निवासरनिशाकृतां क्रमात् ।
मण्डलानि विषक(श्रवो? ध्रुवा)क्षरै-
रर्चयेद्वदनपूर्वदीपितैः ॥ ४० ॥

तत्र तीर्थमनुनाभिवाहयेत्
तीर्थमुष्णरुचिमण्डलात् पुनः ।
स्वीयहृत्कमलतो हरिं तथा
गालिनीं च शिखया प्रदर्शयेत् ॥ ४१ ॥

तज्जलं नयनमन्त्रवीक्षितं
वर्मणा समवगुण्ठ्य दोर्युजा ।
मूलमन्त्रसकलीकृतं न्यसे-
दङ्गकैश्च कलयेद् दिशोऽस्त्रतः ॥ ४२ ॥

अक्षतादियुतमच्युतीकृतं
संस्पृशञ्जपतु मन्त्रमष्टधा ।
किंचन क्षिपतु वार्द्धनीजले
प्रोक्षयेन्निजतनुं ततोऽमुना ॥ ४३ ॥

त्रिः करेण मनुनाखिलं तथा
साधनं कुसुमचन्दनादिकम् ।
शङ्खपूरणविधिः समीरितो
गुप्त एष यजनाग्रणीरिह ॥ ४४ ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धो कावेरि जलेऽस्मिन् संनिधिं कुरु ॥ ४५ ॥

एष तीर्थमनुः प्रोक्तो दुरितौघनिवारणः ।
कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ॥ ४६ ॥

तर्जनीमध्यमानामाः संहता भुग्नवर्जिताः ।
मुद्रैषा गालिनी प्रोक्ता शङ्खस्योपरि चालिता ॥ ४७ ॥

अथ मूर्द्धनि मूलचक्रमध्ये
निजनाथान् गणनायकं समर्च्य ।

न्यसनक्रमतश्च पीठमन्त्रै-
जैलगन्धाक्षतपुष्पधूपदीपैः ॥ ४८ ॥

प्रयजेदथ मूलमन्त्रतेजो
निजमूले हृदये भ्रुवोश्च मध्ये ।
त्रितयं स्मरतः स्मरेत्तदेकी-
कृतमानन्दघनं तडिल्लताभम् ॥ ४९ ॥

तत्तेजोङ्गैः सावयवीकृत्य विभूत्या-
ङ्गान्तं विन्यस्य यजेदासनपूर्वैः ।
भूषान्तैर्भूयो जलगन्धादिभिरर्चां
कुर्याद्भूत्याद्यङ्गविधानावधि मन्त्री ॥ ५० ॥

भूयो वेणुं वदनस्थं वक्षोदेशे च वनमालाम् ।
वक्षोजोर्ध्वं प्रयजेच्च श्रीवत्सं कौस्तुभं रत्नम् ॥ ५१ ॥

श्रीखण्डनिःस्यन्दविचर्चिताङ्गो
मूलेन भालादिषु चित्रकाणि ।
लिख्यादथो पञ्जरमूर्तिमन्त्रै-
रनामया दीपशिखाकृतीनि ॥ ५२ ॥

पुष्पाञ्जलिं वितनुयादथ पञ्चकृत्वो
मूलेन पादयुगले तुलसीद्वयेन ।
मध्ये हयारियुगलेन च मूर्ध्नि पद्म-
द्वन्द्वेन षड्भिरपि सर्वतनौ च सर्वैः ॥ ५३ ॥

श्वेतानि दक्षभागे सितचन्दनपङ्किलानि कुसुमानि ।
रक्तानि वामभागेऽरुणचन्दनपङ्कसिक्तानि ॥ ५४ ॥

तद्वच्च दीपधूपौ समर्प्य धिनुयात् सुधारसैः कृष्णम् ।
मुखवासं दत्त्वा समर्चयेत् सुगन्धिपुष्पाद्यैः ॥ ५५ ॥

ताम्बूलगीतनृत्यवाद्यैः संतोष्य चुलुकसलिलेन[1] ।
ब्रह्मार्पणाख्यमनुना कुर्यात् स्वात्मार्पणं मन्त्री ॥ ५६ ॥

अथवा संकुचितधियामयं विधिर्मूर्तिपञ्जरारब्धः ।
यद्यष्टादशलिपिना स्वार्णपदाङ्गैर्वेणुपूर्वैः प्रोक्तः ॥ ५७ ॥

सुप्रसन्नमथ नन्दतनूजं
भावयञ्जपतु मन्त्रमनन्यः ।
सार्थसंस्मृति यथाविधिसंख्या-
पूरणे सुयमनं विदधीत ॥ ५८ ॥

प्रणवपुटितं बीजं जप्त्वा शतं सहिताष्टकं
निजगुरुमुखादाप्तान् योगान् युनक्तु महामतिः ।
सदमृतचिदानन्दात्माथो जपं (च) समर्पये-
दिति जपविधिः सम्यक्प्रोक्तो मनुद्वितयाश्रितः ॥ ५९ ॥

य इदं जपते विधि (व) न्नरो
भवितासौ दयितः शरीरिणाम् ।
अपि वाक्कमलैकमन्दिरं
परमन्ते समुपैति तन्महः ॥ ६० ॥

इति श्रीक्रमदीपिकायां (ध्यानादिपूजाविधाननिरूपणं नाम)
तृतीयः पटलः सम्पूर्णः ॥ ३ ॥

---

१ 'चुल्लुक' क. पाठः ।

अथ

चतुर्थः पटलः।



कथ्यते(ऽत्र)खलु मन्त्रवर्य्ययोः
साधनं सकलसिद्धिसाधनम् ।
यद्विधाय मुनयो महीयसीं
सिद्धिमीयुरिह नारदादयः ॥ १ ॥

विप्रं प्रध्वस्तकामप्रभृतिरिपुघटं निर्मलाङ्गं गिरिष्ठां
भक्तिं कृष्णाङ्घ्रिपङ्केरुहयुगलरजोरागिणीमुद्वहन्तम् ।
वेत्तारं वेदशास्त्रागमविमलपथां संमतं सत्सु दान्तं
विद्यां यः संविवित्सुः प्रणवतनुमना देशिकं संश्रयेत ॥ २ ॥

संतोषयेदकुटिलार्द्रतरान्तरात्मा
तं स्वैर्धनैश्च वपुषाप्यनुकूलवाण्या ।
अब्दत्रयं कमलनाभधियातिधीर-
स्तुष्ट्यै विवक्षतु[1] गुरावथ मन्त्रदीक्षाम् ॥ ३ ॥

प्रपञ्चसारप्रथिता तु दीक्षा
संस्मार्यते संप्रति सर्वसिद्ध्यै ।
ऋते यया संततजापिनोऽपि
सिद्धिं न यद् दास्यति मन्त्रपूगः ॥ ४ ॥

अथ पुरो विदधीत भुवःस्थली-
मधि यथाविधि वास्तुबलिं बुधः ।
अचलदोर्मितमत्र तु मण्डपं
मसृणवेदिकमारचयेत् ततः ॥ ५ ॥

---

१ 'ति' क. पाठः ।

त्रिगुणतन्तुयुजा कुशमालया
परिवृतं प्रकृतिध्वजभूषितम् ।
मुखचतुष्कपयस्तरुतोरणं
सितवितानविराजितमुज्ज्वलम् ॥ ६ ॥

वसुत्रिगुणिताङ्गुलिप्रमितखातताराय‌तं
वसोर्वसुपतेरथो ककुभि धिष्ण्यमस्मिन् बुधः ।
करोतु वसुमेखलं वसुगणार्द्धकोणं प्रती-
च्यवस्थितग(दा?जा)धरप्रमितयोनिसंलक्षितम् ॥ ७ ॥

ततो मण्डपे गव्यगन्धाम्बुसिक्ते
लिखेन्मण्डलं सम्यगष्टच्छदाब्जम् ।
सवृत्तत्रयं राशिपीठाङ्घ्रिवीथी-
चतुर्द्वारशोभोपशोभाश्रियुक्तम् ॥ ८ ॥

ततो देशिकः स्नानपूर्वं विधानं
विधायात्मपूजावसानं विधिज्ञः ।
स्ववामाग्रतः शङ्खमप्यर्घ्यपाद्या-
च[1]माद्यानि पात्राणि संपूरितानि ॥ ९ ॥

विधायान्यतः पुष्पगन्धाक्षताद्यं
करक्षालने पृष्ठतश्चापि पात्रम् ।
प्रदीपावलीदीपिते सर्वमन्यत्
स्वदृग्गोचरे साधनं चादधीत ॥ १० ॥

वायव्यादीशानपर्यन्तमर्च्या
पीठस्योदग्गौरवी पङ्क्तिरादौ ।
पूज्योऽन्यत्राप्याम्बिकेयः कराब्जैः
पाशं दन्तं सृण्यभीती दधानः ॥ ११ ॥

---

१ 'चमनीयानि' क. पाठः ।

आराध्याधारशक्त्याद्यमरचरणपावध्यथो मध्यभागे
धर्मादीन् वह्निरक्षःपवनशिवगतान् दिक्ष्वधर्मादिकांश्च ।
मध्ये शेषाब्जबिम्बत्रितयगुणगणात्मव्रजं केसराणां
मध्ये मध्ये च शक्तीर्नव समभियजेत् पीठमन्त्रेण भूयः ॥ १२ ॥

ततः शालीन् मध्येकमलममलांस्तण्डुलवरा-
नपि न्यसेद् दर्भांस्तदुपरि च कूर्चाक्षतयुतान् ।
न्यसेत् प्रादक्षिण्यात् तदुपरि कृशानोर्दश कला
यकाराद्यर्णाद्या यजतु च सुगन्धादिभिरिमाः ॥ १३ ॥

न्यसेत् कुम्भं तत्र त्रिगुणितलसत्तन्तुकलितं
जपंस्तारं धूपैः सुपरिमिलितं जोङ्गकमयैः ।
कभाद्यैः कुम्भेऽस्मिन् ठडवसितिभिर्वर्णयुगलै-
स्तथा न्यस्याभ्यर्च्यास्तदनु खमणेर्द्वादश कलाः ॥ १४ ॥

एवं संकल्प्याग्निमाधाररूपं
भानुं तद्वत्कुम्भरूपं विधिज्ञः ।
न्यसेत् तस्मिन्नक्षताद्यैः समेतं
कूर्चं स्वर्णं रत्नवर्य्यैः प्रदीप्तम् ॥ १५ ॥

अथ क्वाथतोयैः क्षकारादिवर्णै-
रकारावसानैः समापूरयेत्तम् ।
स्वमन्त्रत्रिजापावसानं पयोभि-
र्गवां पञ्चगव्यैर्जलैः केवलैर्वा ॥ १६ ॥

कलशजलेऽस्मिन् वसुयुगसंख्याः
स्वरगणपूर्वा न्यसतु तथैव ।
उडुपकलास्ताः सलिलसुगन्धा-
क्षतसुमनोभिस्तदनु यजेच्च ॥ १७ ॥

उदिच्यकुष्ठकुङ्कुमाम्बुलोहसज्जटामुरैः ।
उशीरमित्युदीरितं हरेः प्रियाष्टगन्धकम् ॥ १८ ॥

क्वाथतोयपरिपूरितोदरे
संविलोड्य विधिनाष्टगन्धकम् ।
सोमसूर्यशिखिनां कलाः पृथक्-
सेवकर्म(?)विनियोजयेत् क्रमात् ॥ १९ ॥

तत्तदाक्षरभवास्तु कादिभि-
ष्टादिभिः पुनरुकारजाः कलाः ।
पादिभिर्मलिपिजास्तु बिन्दुजाः
षादिभिः स्वरगणेन नादजाः ॥ २० ॥

समावाहनान्ते सुसंस्थापनात् प्रा-
गृचस्तत्र तत्राभिजप्या बुधेन ।
समभ्यर्च्य तास्ताः पृथक् तच्च पाथो-
ऽर्पयेन्मूलमन्त्रेण कुम्भे यथावत् ॥ २१ ॥

सहकारबोधिपनसस्तबकैः
शतमन्युवल्लिकलितैः कलशम् ।
पिदधातु पुष्पफलतण्डुलकै-
रभिपूर्णया च शुभचक्रिकया ॥ २२ ॥

अभिवेष्टयेत् तदनु कुम्भमुखं
नवनिर्मलांशुकयुगेन बुधः ।
समलंकृतेऽत्र कुसुमादिभिर-
प्यभिवाहयेत् परतरं च महः ॥ २३ ॥

सकलीविधाय कलशस्थममुं
हरिमर्णतत्त्वमनुविन्यसनैः ।

परिपूजयेद् गुरुरथावहितः
परिवारयुक्तमुपचारगणैः ॥ २४ ॥

दत्त्वासनं स्वागतमप्युदीर्य
तथार्घ्यपाद्याचमनीयकानि ।
देयानि पूर्वं मधुपर्कयुञ्जि
नन्दात्मजायाचमनान्तिकानि ॥ २५ ॥

स्नानं च वासश्च विभूषणानि
साङ्गाय तस्मै विनियोज्य मन्त्री ।
गात्रे पवित्रैरथ गन्धपुष्पैः
पूर्वं यजेन्न्यासविधानतोऽस्य ॥ २६ ॥

सृष्टिस्थिती स्वाङ्गयुगं च वेणुं
मालामभिज्ञानवराश्वमुख्यौ ।
मूलेन चात्मार्चनवत्प्रपू(र्य ? ज्य)
समर्चयेदावरणानि भूयः ॥ २७ ॥

दिक्ष्वथ दामसुदामौ वसुदामः किङ्किणी च संपूज्या ।
तेजोरूपास्तद्वद्बहिरङ्गानि च केसरेषु समभियजेत् ॥ २८ ॥

हुतवहनिर्ऋतिसमीरणशिवदिक्षु हृदयादिवर्मपर्यन्तम् ।
पूर्वादिदिक्ष्वतोऽस्त्रं क्रमेण गन्धादिभिश्च शुद्धमनाः ॥ २९ ॥

मुक्तेन्दुकान्तकुवलयहरिनीलहुताशसमप्रभाः प्रमदाः ।
अभयवरस्फुरितकराः प्रधानतनवोऽङ्गदेवताः सर्य्याः ॥ ३० ॥

रुक्मिण्याद्या महिषीरष्टौ संपूजयेद् दलेषु ततः ।
दक्षिणकरधृतकमला वसुपूरितसुपात्रमुद्रितान्यकराः ॥ ३१ ॥

रुक्मिण्याख्या सत्या सनाग्निजित्याह्वया सुनन्दा च ।
भूयश्च मित्रबिन्दा सुलक्ष्मणा ऋक्षजा सुशीला च ॥ ३२ ॥

तपनीयमारकताभाः सुसितविचित्राम्बरा द्विशश्चैताः ।
पृथुकुचभरालसाङ्ग्यो विविधमणिप्रकरविलसिताभरणाः ॥ ३३ ॥

ततो यजेद् दलाग्रेषु वसुदेवं च देवकीम् ।
नन्दगोपं यशोदां च बलभद्रं सुभद्रिकाम् ॥ ३४ ॥

गोपान् गोपीश्च गोविन्दविलीनमतिलोचनाः ।
ज्ञानमुद्राभयकरौ पितरौ पीतपाण्डुरौ ॥ ३५ ॥

दिव्यमाल्याम्बरालेपभूषणे मातरौ पुनः ।
धारयन्त्यौ च वरदं पायसापूर्णपात्रकम् ॥ ३६ ॥

अरुणश्यामले हारमणिकुण्डलमण्डिते ।
बलः शङ्खेन्दुधवलो मुसलं लाङ्गलं दधत् ॥ ३७ ॥

हालालोलो नीलवासा हेलावानेककुण्डलः ।
कलायश्यामला भद्रा सुभद्रा भद्रभूषणा ॥ ३८ ॥

वराभययुता पीतवसना रूढयौवनाः ।
वीणुवेणावेत्रयष्टिशङ्खशृङ्गादिपाणयः ॥ ३९ ॥

गोपा गोप्यश्च विविधोपायनात्तकराम्बुजाः ।
मन्दारादींश्च तद्बाह्ये पूजयेत्कल्पपादपान् ॥ ४० ॥

मन्दारसंतानकपारिजात-
कल्पद्रुमाख्यान् हरिचन्दनं च ।
मध्ये चतुर्दिक्ष्वपि वाञ्छितार्थ-
दानैकदक्षान् फलनम्रशाखान् ॥ ४१ ॥

हरिहव्यवाहतरणिजक्षपाडपा-
म्पतिवायुसोमशिवशेषपद्मजान् ।
प्र[1]यजेत् स्वदिक्ष्वमलधीः स्वजात्यधी
श्वरहेतिपत्रपरिवारसंयुतम् ॥ ४२ ॥

---

१ 'पूजयेत्' क. पाठः ।

कपिशकपिलनीलश्यामलश्वेतधूम्रा-
मलसितशुचिरक्ता वर्णतो वासवाद्याः ।
करकमलविराजत्स्वायुधा दिव्यवेशा
विविधमणिगणौघप्रस्फुरद्भूषणाढ्याः ॥ ४३ ॥

दम्भोलिशक्त्यभिधदण्डकृपाणपाश-
चण्डाङ्कुशाह्वयगदात्रिशिखारिपद्माः ।
अर्च्या बहिर्निजसुलाञ्छितमौलियुक्ताः
स्वस्वायुधाभयसमुद्यतपाणिपद्माः ॥ ४४ ॥

कनकरजततोयदाभ्रशम्पा-
रुणहिमनीलज(वा ? पा)प्रवालभासः ।
क्रमत इह रुचा तु वज्रपूर्वा
रुचिरविलेपनवस्त्रमाल्यभूषाः ॥ ४५ ॥

कथितमावृतिसप्तकमच्युता-
र्चनविधाविति सर्वसुखावहम् ।
प्रयजतादथ वाङ्मपुरन्दरा-
शनिमुखैस्त्रितयावरणं त्विदम् ॥ ४६ ॥

इत्यर्चयित्वा जलपुष्पगन्धैः
कृष्णाष्टकेनाप्यथ कृष्णपूजाम् ।
कुर्याद् बुधस्तानि समाह्वयानि
वक्ष्यामि तारादिनमोन्तिकानि ॥ ४७ ॥

श्रीकृष्णो वासुदेवश्च नारायणसमाह्वयः ।
देवकीनन्दनयदुश्रेष्ठौ वार्ष्णेय इत्यपि ॥ ४८ ॥

असुराक्रान्तशब्दान्ते भारहारीति सप्तमः ।
धर्मसंस्थापकश्चाष्टौ चतुर्थ्यन्ताः क्रमादिमे ॥ ४९ ॥

एभिरेवाथवा पूजा कर्तव्या कंसवैरिणः ।
संसारसागरोत्तीर्णैः सर्वकामाप्तये बुधैः ॥ ५० ॥

साराङ्गारे घृतविलुलितैर्जर्जरैः संविकीर्णैः
गुग्गूलाद्यैर्घनपरिमलं धूपमापाद्य मन्त्री ।
दद्यान्नीचैर्दनुजमथनायापरेणाथ दोष्णा
घण्टां गन्धाक्षतकुसुमकैरर्चितां वादमानः ॥ ५१ ॥

उद्यद्दीप्तिं सुरभिघृतसंसिक्तकर्पूरवर्त्या
दीपं दृष्ट्वाद्यतिविशदधीः पादपर्यन्तमुच्चैः ।
दत्त्वा पुष्पाञ्जलिमपि विधायार्पयित्वा च पाद्य-
माचामं कल्पयतु[1] विमलं स्वर्णपात्रे निवेद्यम् ॥ ५२ ॥

सुरभितरेण दुग्धहविषा सुशृतेन सिता-
समुपदंशकै रुचिरहृद्यविचित्ररसैः ।
दधिनवनीतनूतनसितोपलपूपलिका-
घृतगुडनारिकेलकदलीफलपुष्परसैः ॥ ५३ ॥

अस्त्रोक्षितं तदरिमुद्रिकयाभिरक्ष्य
वायव्यतो[2]ऽथ परिशोषितमग्निदोष्णा ।
संदह्य वामकरसौधरसाभिपूर्णं
मन्त्रामृतीकृतमथाभिमृशन् प्रजप्यात् ॥ ५४ ॥

मनुमष्टशः सुरभिमुद्रिकया
परिपूर्णमर्चयतु गन्धमुखैः ।
हरिमर्चयेदथ कृतप्रसवा-
ञ्जलिरास्यतोऽस्य विसरच्च महः ॥ ५५ ॥

वीतिहोत्रदयितान्तमुच्चरन्
मूलमन्त्रमथ निक्षिपेज्जलम् ।

---

१ 'येत्तद्विमलमतिरथो' क. पाठः । २ 'य' क. पाठः ।

अर्पयेत्(त)दमृतात्मकं हवि-
दोर्युजा सकुसुमं समुद्धरन् ॥ ५६ ॥

निवेदयामि भवते जुषाणेदं हविर्हरे ।
निवेद्यार्पणमन्त्रोऽयं सर्वार्चासु निजाख्यया ॥ ५७॥

ग्रासमुद्रां वामदोष्णा विकचोत्पलसन्निभाम् ।
प्रदर्शयन् दक्षिणेन प्राणादीनां च दर्शयेत् ॥ ५८॥

स्पृशेत् कनिष्ठोपकनिष्ठिके द्वे
स्वाङ्गुष्ठमूर्ध्ना प्रथ(मे?मा)तु मुद्रा ।
तथापरा तर्जनिमध्यमे स्या-
दनामिकामध्यमिके च मध्या ॥ ५९ ॥

अनामिकातर्जनिमध्यमा स्यात्
तद्वच्चतुर्थी सकनिष्ठिकास्ताः ।
स्यात्पञ्चमी तद्वदिति प्रदिष्टा
प्राणादिमुद्रा निजमन्त्रयुक्ताः ॥ ६० ॥

प्राणापानव्यानोदानसमानाः क्रमाच्चतुर्थ्या युक्ताः ।
ताराद्या वध्वन्ताः कृष्णाध्वनस्तत्र ते मनवः ॥ ६१ ॥

ततो निबध्य मुद्रिकां प्रधानया करद्वये ।
स्पृशन्ननामिकां निजं मनुं जपन् प्रदर्शयेत् ॥ ६२ ॥

(नन्द?चन्द्र)जोऽम्बुमनुबिन्दुयुङ् नतिः
पार्श्वरा मरुद(वात्मने?थोऽग्नी)ति च ।
रुद्रङेयुतनिवेद्यमात्मभू-
मांसपार्श्वमनिलस्तथा(सि?मि)युक् ॥ ६३ ॥

मण्डलमभितो मन्त्री बीजाङ्कुरभाजनानि विन्यस्य ।
पिष्टमयानपि दीपान् घृतपूर्णान् विन्यसेत्सुदीप्तशिखान् ॥ ६४ ॥

अथ संस्कृते हुतवहेऽमलधी-
रभिवाद्य सम्यगभिपूज्य हरिम् ।
जुहुयात् सिताघृतयुतेन पयः-
परिसाधितेन सितदीधितिना ॥ ६५ ॥

अष्टोत्तरं सहस्रं होमं समाप्य पुनर्बलिं दद्यात् ।
राशिष्वधिनाथेभ्यो नक्षत्रेभ्यस्ततश्च करणेभ्यः ॥ ६६ ॥

संपाद्य पानीयसुधां समर्प्य
दत्त्वाम्भ उद्वास्य मुखार्चिरास्ये ।
नैवेद्यमुद्धृत्य निवेद्य विष्वक्-
सेनाय पृथ्वीमुपलिप्य भूयः ॥ ६७ ॥

गण्डूषदन्तपवनाचमनास्यहस्त-
मृज्यानुलेपमुखवासकमाल्यभूषाः ।
ताम्बूलमप्यभिसमर्प्य सुवाद्यनृत्य-
गीतैः सुतृप्तमभिपूजयतात् पुरेव ॥ ६८ ॥

गन्धादिभिः सपरिवारमथार्घ्यमस्मै
दत्त्वा विधाय कुसुमाञ्जलिमादरेण ।
स्तुत्वा प्रणम्य शिरसा चुलुकोदकेन
स्वात्मानमर्पयतु तच्चरणाब्जमूले ॥ ६९ ॥

इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत् स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ।

मां मदीयं च सकलं हरये सम्यगर्पये ।
ओंतत्सदिति च प्रोक्तो मन्त्रः स्वात्मसमर्पणे ॥ ७० ॥

अनुस्मरन् कलशगमच्युतं जपेत्
सहस्रकं मनुमथ साष्टकं बुधः ।

वपुष्यथो दितिजजितः समावृती-
विलाप्य तास्तदपि नयेत् स्वधामताम् ॥ ७१ ॥
ध्वजतोरणदिक्कल(सा?शा)धिगता-
मपि मण्डलमण्डपकुण्डगताम् ।
अभियोज्य चितिं कलशे कुसुमैः
परिपूज्य जपेन्मनुमष्टशतम् ॥ ७२ ॥
अथ शिष्य उपोषितः प्रभाते
कृतनैत्यः सुसिताम्बरः सुवेशः ।
धरणीधनधान्यगोदुकूलै-
र्धिनुयाद्विप्रवरान् हरेः प्रतृप्त्यै ॥ ७३ ॥
भूयः परीत्य प्रणिपत्य देशिकं
तस्मै परस्मै पुरुषाय देहिने ।
तां वित्तशाठ्यं परिहृत्य दक्षिणां
दत्त्वा तनुं स्वां च समर्पयेत् सुधीः ॥ ७४ ॥
अथाभिषेकमण्डपे सुखोपविष्टमासने ।
गुरुर्विशोधयेदमुं पुरैव शोषणादिभिः ॥ ७५ ॥
पीठन्यासावसानं वपुषि विमलधीर्न्यस्य तस्यासिकायां
मन्त्रेणाभ्यर्च्य दूर्वाक्षतकुसुमयुतां रोचनां के निधाय ।
आशीर्वादैर्द्विजानां पटुविशदरवैर्गीतवादित्रघोषै-
र्माङ्गल्यैरानयेत्तं कलशमभिवृतस्तत्समीपं प्रतीतः ॥ ७६ ॥
तेनाभिनीलमणिरत्नमहौषधेन
धाम्ना परेण परमामृतरूपभाजा ।
संपूरयन् वपुरमुष्य ततो वितन्वं-
स्तत्सामरस्यमभिषेचयताद्यथावत् ॥ ७७ ॥

क्षाद्यैरान्तैर्वर्णैरभिपूर्णतनुस्त्रिरुक्तमन्त्रार्णैः ।
परिधृतसिततरवसनद्वितयो वाचंयमः समाचान्तः ॥ ७८ ॥

बहुशः प्रणम्य देशिकनामानं हरिमथोपसंगृह्य ।
तद्दक्षिणत उपास्तामभिमुख एकाग्रमानसः शिष्यः ॥ ७९ ॥

न्यासैर्यथाविधि तमच्युतसाद्विधाय
गन्धाक्षतादिभिरलङ्कृतवर्मणोऽस्य ।
ऋष्यादियुक्तमथ मन्त्रवरं यथावद्
ब्रूयात् त्रिशो गुरुरनर्घ्यमवामकर्णे ॥ ८० ॥

गुरुणा विधिवत् प्रसाधितं
मनुमष्टोर्ध्वशतं प्रजप्य भूयः ।
अभिवन्द्य ततः शृणोतु सम्यक्-
समयान् भक्तिभरावनम्रमूर्तिः ॥ ८१ ॥

दत्त्वा शिष्याय मनुं न्यस्याथ गुरुः कृतात्मयजनविधिः ।
अष्टोत्तरसहस्रं स्वशक्तिहान्यनवाप्तये जप्यात् ॥ ८२ ॥

कुम्भादिकं च सकलं गुरवे समर्प्य
संभोजयेद् द्विजवरानथ भोज्यजातैः ।
कुर्वन्त्यनेन विधिना य इहाभिषेकं
ते संपदां निलयनं हि त एव धन्याः ॥ ८३ ॥

संक्षिप्य किञ्चिदुदिता दीक्षा संस्मरणाय विशदधियाम् ।
एनां प्रविश्य मन्त्री सर्वान् मन्त्राञ्जपेज्जुहोतु यजेच ॥ ८४ ॥

इति श्रीक्रमदीपिकायां (दीक्षादिविधिनिरूपणं नाम)
चतुर्थः पटलः सम्पूर्णः ॥ ४ ॥

अथ

पञ्चमः पटलः।



चैत्रे कृत्वैतन्मासि कर्माच्छपक्षे
पुण्यर्क्षे भूयो देशि(कां ? कात्)प्राप्य दीक्षाम्।
तेनानुज्ञातः पूर्वसेवां द्वितीये
मासि द्वादश्यामारभेचामलायाम् ॥ १ ॥

कृत्वा स्नानाद्यं कर्म देहार्चनान्तं
वत्मीश्रित्य प्रागीरितं मन्त्रिमुख्यः।
शुद्धो मौनी ब्रह्मचारी निशाशी
जप्याच्छान्तात्मा शुक्लपक्षात्तदाम्ना ॥ २ ॥

तनुशुश्रूषां गोषु ताभ्यः प्रयच्छन्
ग्रासं भूतेषु प्रोद्वहंश्चानुकम्पाम्।
मन्त्राधिष्ठात्रीं देवतां वन्दमानो
दुर्गां दुर्बोधध्वान्तभानुं गुरुं च ॥ ३ ॥

कुर्वन्नात्मीयं कर्म वर्णाश्रमस्थं
मन्त्रं जपाद्भिः स्नानकालेऽभिषिञ्चेत्।
आचामन् पाथस्तत्त्वसंख्याप्रजप्तं
भुञ्जानश्चान्नं सप्तजप्तं जलाद्यम् ॥ ४ ॥

प्रजपेदयुतचतुष्कं दशाक्षरं मनुवरं पृथक् क्रमशः।
अष्टादशाक्षरं चेदयुतद्वयमित्युदीरिता संख्या ॥ ५ ॥

शाकं मूलं फलं गोस्तनभवदधिनी भैक्षमन्नं च (श ? स)क्तून्
दौग्धान्नं चेत्यदानः क्षितिधरशिखरादौ क्रमात् स्थानभेदात्।

एकं चैषामशक्तौ गदितमिह मया पूर्वसेवाविधानं
निर्वृत्तेऽस्मिन् पुनश्च प्रजपतु विधिवत् सिद्धये साधकेशः ॥ ६ ॥

देवार्चनान्ते दिनशो दिनादौ
दीक्षोक्तमाज्ञान्यतरं विधानम् ।
आश्रित्य कृत्स्नं प्रयजेद् विविक्ते
गेहे निषण्णो हुतशेषभोजी ॥ ७ ॥

दशलक्षमक्षयफलप्रदं मनुं
प्रतिजप्य निर्मलमतिर्दशाक्षरम् ।
जुहुयाद्गुडाज्यमधुसंप्लुतैर्नवै-
ररुणाम्बुजैर्हुतवहे दशायुतम् ॥ ८ ॥
शुषिरयुगलवर्णं चेन्मनुं पञ्चलक्षं
प्रजपतु जुहुयाच्च प्रोक्तक्लृप्त्यार्धलक्षम् ।
अमलमतिरलाभे पायसैरम्बुजानां
[1]सुहितघृतसिताक्तैरारभेद्धोमकर्म ॥ ९ ॥
अशक्तानां होमे निगमरसनागेन्द्रगुणितो
जपः कार्यो वेति द्विजनृपविशामाहुरपरे ।
सहोमश्चेदेषां सम इह जपो होमरहितो
य उक्तो वर्णानां स खलु विहितस्तच्चलदृशाम् ॥ १० ॥

यं वर्णमाश्रितो यः शूद्रः स च तन्नतभुवां विहितम् ।
विदधीत जपं विधि(व)च्छ्रद्धावान् भक्तिभावनम्रतनुः ॥ ११ ॥

पुनरभिषिक्तो गुरुणा विधिवद्विश्राण्य दक्षिणां तस्मै ।
अभ्यवहार्य्य च विप्रान् विभवैः संप्रीणयेच्च भक्तियुतः ॥ १२ ॥

इति मन्त्रवरद्वितयान्यतरं
परिसाध्य जपादिभिरच्युतधीः ।

---

१ 'स' क. पाठः ।

प्रयजेत् सवनत्रितये दिनशो
विधिनाथ मुकुन्दममन्दमतिः ॥ १३ ॥

अथ श्रीमदुद्यानसंवीतहेम-
स्थलोद्भासिरत्नस्फुरन्मण्डपान्तः ।
लसत्कल्पवृक्षाध उद्दीप्तरत्न-
स्थलाधिष्ठिताम्भोजपीठाधिरूढम् ॥ १४ ॥

महानीलनीलाभमत्यन्तबालं
घन¹स्निग्धवक्त्रान्तविस्रस्तकेशम् ।
अलिव्रातपर्याकुलोत्फुल्लपद्म-
प्रमुग्धाननं श्रीमदिन्दीवराक्षम् ॥ १५ ॥

चलत्कुण्डलोल्लासिसंफुल्लगण्डं
सुघोणं सुशोणाधरं सुस्मितास्यम् ।
अनेकाश्मरश्म्युल्लसत्कण्ठभूषा-
लसन्तं वहन्तं नखं पौण्डरीकम् ॥ १५ ॥

समुद्धूलितो²रःस्थलं धेनुधूल्या
सुपुष्टाङ्गमष्टापदाकल्पदीप्तिम् ।
कटीरस्थले चारुजङ्घान्तयुग्मे
पिनद्धं क्वणत्किंकिणीजालधाम्ना ॥ १६ ॥

हसन्तं हसद्बन्धुजीवप्रसून-
प्रभापाणिपादाम्बुजोदारकान्त्या ।
करे दक्षिणे पायसं वामहस्ते
दधानं नवं शुद्धहैयङ्गवीनम् ॥ १७ ॥

महीभारभूतामराराति यूथा-
ननःपूतनादीन् निहन्तुं प्रवृत्तम् ।

---

१ 'गुड' क. पाठः । २ 'षरो' क. पाठः ।

प्रभुं गोपिकागोपगोवृन्दवीतं
सुरेन्द्रादिभिर्वन्दितं देववृन्दैः ॥ १८ ॥

प्रगे पूजयेद्वेत्यनुस्मृत्य विष्णुं
तदङ्गेन्द्रवज्रादिभिर्भक्तिनम्रः ।
सितामोचहैयङ्गवीनैश्च दध्ना
विमिश्रेण [1]दुग्धेन संप्रीणयेत्तम् ॥ १९ ॥

इति प्रातरेवार्चयेदच्युतं यो
नरः प्रत्यहं शश्वदास्तिक्ययुक्तः ।
लभेत् सोऽचिरेणैव लक्ष्मीं समग्रा-
मिह प्रेत्य शुद्धं परं धाम यायात् ॥ २० ॥

अह्नो मुखेऽनुदिनमित्यभिपूज्य शौरिं
दध्नाथवा गुडयुतेन निवेद्य तोयैः ।
श्रीमन्मुखे समनुतर्प्य च तद्धिया तं
जप्यात् सहस्रमथ साष्टकमादरेण ॥ २१ ॥

मध्यन्दिने जपविधानविशिष्टरूपं
वन्द्यं सुरर्षियतिखेचरमुख्यवृन्दैः ।
गोगोपगोपवनितानिकरैः परीतं
सान्द्राम्बुदच्छविसुजातमनोहराङ्गम् ॥ २२ ॥

मायूरपत्रपरिक्लृप्तवतंसरम्य-
धम्मिल्लमुल्लसितचिल्लिकमम्बुजाक्षम् ।
पूर्णेन्दुबिम्बवदनं मणिकुण्डलश्री-
गण्डं सुनासमतिसुन्दरमन्दहासम् ॥ २३ ॥

पीताम्बरं रुचिरनूपुरहारकाञ्ची-
केयूरकोर्मिकटकादिभिरुज्ज्वलाङ्गम् ।

---

१ 'दौ, क. पाठः ।

दिव्यानुलेपनपिशङ्गितमंसराज-
दम्लानचित्रवनमालमनङ्गदीप्ति[1]म् ॥ २४ ॥
वेणुं धमन्तमथवा स्वकरे दधानं
सव्ये दरं पशुपयष्टिमुदारवेणुम् ।
दक्षे मणिप्रवरमीप्सितदानदक्षं
ध्यात्वेत्थमर्चयतु नन्दजमिन्दिराप्त्यै ॥ २५ ॥
दामादिकाङ्गदयितासुहृदङ्घ्रिपेन्द्र-
वज्रादिभिः समभिपूज्य यथाविधानम् ।
दीक्षाविधिप्रकथितं च निवेद्यजातं
हैमे निवेदयतु पात्रवरे यथावत् ॥ २६ ॥
अष्टोत्तरं शतमथो जुहुयात् पयोऽन्नैः
सर्पिर्युतैः सुसितशर्करया विमिश्रैः ।
दद्याद्बलिं च निजदिक्षु सुरर्षियोगि-
वर्गोपदैवतगणेभ्य उदारचेताः ॥ २७ ॥
नवनीतमिलितपायसधियार्चनान्ते जलैर्मुखे तस्य ।
संतर्प्य जपतु मन्त्री सहस्रमष्टोत्तरशतं वापि ॥ २८ ॥
अह्नो मध्ये वल्लवीवल्लभं तं
नित्यं भक्त्याभ्यर्चयेद् यो नराग्र्यः ।
देवाः सर्वे तं नमस्यन्ति शश्वद्-
वर्तेरन् वै तद्वशे सर्वलोकाः ॥ २९ ॥
मेधायुःश्रीकान्तिसौभाग्ययुक्तः
पुत्रैर्मित्रैर्गोमहीरत्नधान्यैः ।
भोगैश्चान्यैर्भूरिभिः सन्निहाढ्यो
यायाद् भूयो धाम तच्चाच्युताख्यम् ॥ ३० ॥

---

१ 'प्तम्' क. पाठः ।

तृतीयकालपूजायामस्ति कालविकल्पना ।
सायाह्ने निशि वेल्यत्र वदन्त्येके मनीषिणः ॥ ३१ ॥
दशाक्षरेण चेद्रात्रौ सायाह्नेऽष्टादशार्णतः ।
उभयमुभयेनैव कुर्यादित्यपरे जगुः ॥ ३२ ॥
सायाह्ने द्वारवत्यां तु चित्रोद्यानोपशोभिते ।
द्व्यष्टसाहस्रसंख्यातैर्भवनैरपि शोभिते ॥ ३३ ॥
हंससारससंकीर्णैः कमलोत्पलशोभिभिः ।
सरोभिरमलाम्भोभिः परीते भवनोत्तमे ॥ ३४ ॥
उद्यत्प्रद्योतनद्योतसद्युतौ मणिमण्डपे ।
मृद्वास्तरे समासीनं हेमाम्भोजासने हरिम् ॥ ३५ ॥
नारदाद्यैः परिवृतमात्मतत्त्वविनिर्णये ।
तेभ्यो मुनिभ्यः स्वं धाम दिशन्तं परमक्षरम् ॥ ३६ ॥
इन्दीवरनिभं सौम्यं पद्मपत्रायतेक्षणम् ।
स्निग्धकुन्तलसंभिन्न[1]मरीचिमुकुटोज्ज्वलम् ॥ ३७ ॥
चारुप्रसन्नवदनं स्फुरन्मकरकुण्डलम् ।
श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनम् ॥ ३८ ॥
काश्मीरकपिशोरस्कं पीतकौशेयवाससम् ।
हारकेयूरकटकरशनाद्यैः परि(स्कृ ? ष्कृ)तम् ॥ ३९ ॥
हृतविश्वंभराभूरिभारं मुदितमानसम् ।
शङ्खचक्रगदापद्मराजद्भुजचतुष्टयम् ॥ ४० ॥
एवं ध्यात्वार्चयेन्मन्त्री स्यादङ्गैः प्रथमावृतिः ।
द्वितीया महिषीभिस्तु तृतीयायां समर्चयेत् ॥ ४१ ॥
नारदं पर्वतं जिष्णुं निशठोद्धवदारुकान् ।
विष्वक्सेनं च शैलेयं दिक्ष्वग्रे विनतासुतम् ॥ ४२ ॥

१ 'किरीट' क. पाठः ।

लोकेशैस्तत्प्रहरणैः पुनरावरणद्वयम् ।
इति संपूज्य विधिवत् पायसं च निवेदयेत् ॥ ४३ ॥
तर्पयित्वा खण्डमिश्रदुग्धबुद्ध्या जलैर्हरिम् ।
जपेदष्टशतं मन्त्री भावयन् पुरुषोत्तमम् ॥ ४४ ॥
पूजासु होमं सर्वासु कुर्यान्मध्यन्दिनेऽथवा ।
आसनाद्यर्घ्यपर्यन्तं कृत्वा स्तुत्वा नमेत् सुधीः ॥ ४५ ॥
समर्प्यात्मानमुद्वास्य तं स्वहृत्सरसीरुहे ।
विन्यस्य तन्मयो भूत्वा पुनरात्मानमर्चयेत् ॥ ४६ ॥
सायाह्ने वासुदेवं यो नित्यमेव यजेन्नरः ।
सर्वान् कामानवाप्यान्ते स याति परमां गतिम् ॥ ४७ ॥
रात्रौ चेन्मन्मथाक्रान्तमानसं देवकीसुतम् ।
यजेद् रासपरिश्रान्तं गोपीमण्डलमध्यगम् ॥ ४८ ॥

पृथुं सुवृत्तं मसृणं वितस्ति-
मात्रोन्नतं कौ विनिखन्य शङ्कुम् ।
आक्रम्य पद्भ्यामितरेतरात्त-
हस्तैर्भ्रमोऽयं खलु रासगोष्ठी ॥ ४९ ॥

स्थलनीरजमूलपरागभृता
लहरीकणजालभरेण सता ।
मरुता परितापहृताध्युषिते
सुसिते यमुनापुलिने विपुले ॥ ५० ॥

अशरीरनिशातशरोन्मथित-
प्रमदाशतकोटिभिराकुलिते ।
उडुनाथकरैर्विषदीकृतदिक्-
प्रसरे विचरद्भ्रमरीनिकरे ॥ ५१ ॥

विद्याधरकिन्नरसिद्धसुरै-
गन्धर्वभुजङ्गमचारणकैः ।
दारोपहितैः सुविमानगतैः
खस्थैरभिवृष्टसुपुष्पचयैः ॥ ५२ ॥

इतरेतरबद्धकरप्रमदा-
गणकल्पितवासविहारविधौ ।
मणिशङ्कुगमप्यमुना वपुषा
बहुधा विहितस्वकदिव्यतनुम् ॥ ५३ ॥

सुदृशामुभयोः पृथगन्तरगं
दयिताकुलबद्धभुजद्वितयम् ।
निजसङ्गविजृम्भदनङ्गशिखि-
ज्वलिताकुलसत्पुलकालियुजम् ॥ ५४ ॥

विविधश्रुतिभिन्नमनोज्ञतर-
स्वरसप्तकमूर्च्छनतालगणैः ।
भ्रममाणममूभिरुदारमणि-
स्फुटमण्डनशिञ्जितचारुतरम् ॥ ५५ ॥

इति भिन्नतनुं मणिभिर्मिलितं
तपनीयमयैरिव मारकतम् ।
मणिनिर्मितमध्यगशङ्कुलस-
द्विपुलारुणपङ्कजमध्यगतम् ॥ ५६ ॥

अतसीकुसुमाभतनुं तरुणं
तरुणारुणपद्मपलाशदृशम् ।
नवपल्लवचित्रसुगुच्छलस-
च्छिखिपिच्छपिनद्धकचप्रचयम् ॥ ५७ ॥

बहुलेतरचन्द्रसमानमुखं
मणिकुण्डलमण्डितगण्डयुगम् ।
शशवक्त्रसदृग्रदनच्छदं
मणिराजदनेकविधाभरणम् ॥ ५८ ॥
अ(श ? स)नप्रसवच्छदनोज्ज्वलस-
द्वदनं सुविलासविलासभुवम् ।
नवविद्रुमभद्रकराङ्घ्रितलं
भ्रमराकुलदामविराजिभुजम् ॥ ५९ ॥
तरुणीकुचयुक्परिरम्भमिलद्-
घुसृणारुणवक्षसमुक्षगतिम् ।
शिववेणुसमीरितगानपरं
स्मरविह्वलितं भुवनैकगुरुम् ॥ ६० ॥
प्रथमोदितपीठवरे विधिवत्
प्रयजेदतिरूपमरूपमजम् ।
प्रथमं परिपूज्य तदङ्गवृतिं
मिथुनानि यजेद्रसगानि ततः ॥ ६१ ॥
दलषोडशके स्वरमूर्तिगणं
सहशक्तिकमुत्तमरासगतम् ।
सरमावदनं स्वकलासहितं
मिथुनार्द्धमथेन्द्रपविप्रमुखान् ॥ ६२ ॥
इति सम्यगमुं परिपूज्य हरिं
चतुरावृतिसंवृतमार्द्रमतिः ।
रजतारचिते चषके ससितं
सुश्रृतं सुपयोऽस्य निवेदयतु ॥ ६३ ॥

विभवे सति कांस्यमयेषु पृथक्
चषकेषु तु षोडशसु क्रमशः ।
मिथुनेषु निवेद्य पयः ससितं
विदधीत पुरोवदथो सकलम् ॥ ६४ ॥

सकलभुवनमोहनं विधिं यो
नियतममुं निशि निश्युदारचेताः ।
भजति स खलु सर्वलोकपूज्यः
श्रियमचलां समवाप्य यात्यनन्तम् ॥ ६५ ॥

निशि वा दिनान्तसमये प्रपूजयेन्नित्यशोऽच्युतं भक्त्या ।
समफलमुभयं हि ततः संसाराब्धिं समुत्तितीर्षति यः ॥ ६६ ॥

इत्येवं मनुविग्रहं मधुरिपुं यो रात्रिकालं भजेत्
तस्यैवाखिलजन्तुजातदयितस्याम्भोधिजावेश्मनः ।
हस्ते धर्मसुखार्थमोक्षतरवः सद्वर्गसंप्रार्थिताः
सान्द्रानन्दसुधारसद्रवमुचो येषां फलश्रेणयः ॥ ६७ ॥

अथोच्यते पूर्वसमीरितानां
पूजावसाने परमस्य पुंसः ।
कल्पस्तु कामेष्वपि तर्पणानां
विनापि पूजां खलु वै फलं स्यात् ॥ ६८ ॥

संतर्प्य [1]पीठमन्त्रैः शक्तीः [2]सकृत्प्रथममच्युतं तत्र ।
आवाह्य पूजयेत्तं तोयैरेवाखिलैः समुपहारैः ॥ ६९ ॥

बद्ध्वाथ धेनुमुद्रां तोयैः संपाद्य तर्पणद्रव्यम् ।
तद्बुद्ध्याञ्जलिना तं सुवर्णचषकीकृतेन तर्पयतु ॥ ७० ॥

विंशतिरष्टोपेता कालत्रयतर्पणेषु संख्योक्ता ।
भूयः स्वकालविहिता सकृत्सकृत्तर्पयेच्च परिवारान् ॥ ७१ ॥

---

१ 'पा' क. पाठः । २ 'सकृत्सकृत्' क. पाठः ।

प्रातर्दधिगुडमिश्रं मध्याह्ने पायसं सनवनीतम् ।
क्षीरं तृतीयकाले ससितोपलमित्युदीरितं द्रव्यम् ॥ ७२ ॥
तर्पयामि पदं योज्यं मन्त्रान्तेष्वेषु नामसु ।
द्वितीयान्तेषु तु पुनः पूजाशेषं समापयेत् ॥ ७३ ॥

अभ्युद्धृत्य तत्प्रसादाद्भिरात्मानं प्रपिबेदपः ।
तं जप्त्वा तमथोद्वास्य तन्मयः प्रजपेन्मनुम् ॥ ७४ ॥
अथ द्रव्याणि काम्येषु वक्ष्यन्ते तर्पणेषु तु ।
तानि प्रोक्तविधानानामाश्रित्यान्यतमं यजेत् ॥ ७५ ॥

द्रव्यैः षोडशभिरमुं तर्पयेदेकतश्चतुर्वारम् ।
स चतुः क्षीराद्यन्तैः सकृज्जलाद्यं तमच्युतं भक्त्या ॥ ७६ ॥
पायसं दाधिकं कृ(ष?स)रं गौडान्नं पयो दधि नवनीतम् ।
आज्यं कदली मोचा रजःस्वला(?)मोदकापूपम् ॥ ७७ ॥
पृथुकं लाजसमेतं द्रव्याणां कथितमिह षोडशकम् ।
लाजान्तेऽन्त्यक्षीरात् प्राक् समर्प्य सितोपलपुञ्जम् ॥ ७८ ॥

प्रगे चतुःसप्ततिवारमित्यमुं
प्रतर्पयेद् योऽनुदिनं नरो हरिम् ।
अनन्यधीस्तस्य समस्तसंपदः
करस्थिता मण्डलतोऽभिवाञ्छिताः ॥ ७९ ॥

धारोष्णपक्वपयसी दधिनवनीते घृतं च दौग्धान्नम् ।
मत्स्यण्डी मध्वमृतं द्वादशशस्तर्पयेन्नवभिरेभिः ॥ ८० ॥
तर्पणविधिरयमपरः पूर्वोदितसमफलाष्टशतसंख्यः ।
कार्मणकर्मणि [1]कृष्टौ जनसं[2]चलने विशेषतो विहितः ॥ ८१ ॥

सखण्डधारोष्णाधिया मुकुन्दं
व्रजं पुरं ग्राममपि प्रतर्प्य ।

१ 'कीर्तौ' क. पाठः । २ 'व' क. पाठः ।

लभेत भोज्यं सरसं स्वभृत्यै
वासांसि धान्यानि धनानि मन्त्री ॥ ८२ ॥

यावत् सन्तर्पयेन्मन्त्री तावत्संख्यां यजेन्मनुम् ।
तर्पणेनैव कार्याणि साधयेदखिलान्यपि ॥ ८३ ॥

द्विजो भिक्षावृत्तिर्य इह दिनशो नन्दतनयः
स्वयं भूत्वा भिक्षामटति विहरन् गोपसुदृशाम् ।
अमा चेतोभिः स्वैर्ललितललितैर्नर्मविधिभि-
र्दधिक्षीरा[1]ज्याढ्यां प्रचुरतरभिक्षां स लभते ॥ ८४ ॥

मध्ये कोणेषु षट्स्वप्यनलपुरपुटस्यालिखेत् कर्णिकायां
कन्दर्पं साध्ययुक्तं विवरगतषडर्णद्विशः केसरेषु ।
शक्तिश्रीपूर्वकालिद्विनवलिपिमनोरक्षराणि च्छदानां
मध्ये वर्णान् दशानां दशलिपिमनुवर्यस्य चैकैकशोऽब्जम् ॥ ८५ ॥

भूसद्मनाभिवृतमस्त्रिगमन्मथेन
गोरोचनाभिलिखितं तपनीयसूच्या ।
पट्टे हिरण्यरचिते गुलिकीकृतं तद्-
गोपालयन्त्रमखिलार्थदमेतदुक्तम् ॥ ८६ ॥

संपातसिक्तमभिजप्तमिदं महद्भि-
र्धार्यं जगत्त्रयवशीकरणैकदक्षम् ।
रक्षायशःसुतमहीधनधान्यलक्ष्मी-
सौभाग्यलिप्सुभिरजस्रमनर्घ्यवीर्यम् ॥ ८७ ॥

भूतोन्मादापस्मृतिविषमूर्च्छाविषमज्वरार्तानाम् ।
ध्यायञ् शिरसि प्रजपेन्मन्त्रमिदं झटिति शमयितुं विकृतीः ॥ ८८ ॥
[2]मारस्त्रिविक्रमाक्रान्तश्चक्री ङेणाय हृदित्यसौ ।
षडक्षरोऽयं संप्रोक्तः सर्वसिद्धिकरो मनुः ॥ ८९ ॥

१ 'दा' क. पाठः । २ 'सु' क. पाठः ।

क्रोडोऽग्निदीप्तो मायावी लवलाञ्छितमस्तकः ।
सैषा शक्तिः परा सूक्ष्मा नित्या संवित्स्वरूपिणी ॥ ६० ॥
अस्थ्यग्निगोविन्दलवैर्लक्ष्मीबीजं समीरितम् ।
आभ्यामष्टादशलिपिः स्याद्विंशत्यक्षरो मनुः ॥ ६१ ॥
शालग्रामे मनौ यन्त्रे मण्डले प्रतिमासु च ।
नित्यं पूजा हरेः कार्या नतु केवलभूतले ॥ ६२ ॥

इति जपहुतपूजातर्पणाद्यैर्मुकुन्दं
य इह भजति मन्वोरेकमाश्रित्य नित्यम् ।
स तु सुचिरमयत्नात् प्राप्य भोगानशेषान्
पुनरमलतरं तद्धाम विष्णोः प्रयाति ॥ ६३ ॥

इति श्रीक्रमदीपिकायां (पुरश्चर्यादिविधानं नाम)
पञ्चमः पटलः ॥ ५ ॥



अथ

षष्ठः पटलः ।



विनियोगानथो वक्ष्ये मन्त्रयोरुभयोः समान् ।
तदर्थकारिणोऽनन्तवीर्यान् मन्त्रांश्च कांश्चन ॥ १ ॥
वन्दे तं देवकीसूनुं सद्योजाताम्बुदप्रभम् ।
पीताम्बरं करलसच्चक्रशङ्खगदाम्बुजम् ॥ २ ॥
एवं ध्यात्वा जपेन्मन्त्रं लक्षं ब्राह्मे मुहूर्तके ।
स्वादुप्लुतैश्च कुसुमैः पालाशैरयुतं हुनेत् ॥ ३ ॥
मन्वोरन्यतरेणैव कुर्याद्यः सुसमाहितः ।
स्मृतिमेधाधृतिबलं लब्ध्वा स कविराड् भवेत् ॥ ४ ॥
स्यान्मनुस्तत्समजपध्यानहोमफलोऽपरः ।
श्रीमन्मुकुन्दचरणौ सदेति शरणं ततः ॥ ५ ॥
अहं प्रपद्य इत्युक्तो मौकुन्दोऽष्टादशाक्षरः ।
नारदोऽस्य तु गायत्री मुकुन्दश्चर्षिपूर्वकः ॥ ६ ॥
प्रातः प्रातः पिबेत्तोयं जप्त्वा योऽष्टोत्तरं शतम् ।
अनेन षड्भिर्मासैः स भवेच्छ्रुतिधरो नरः ॥ ७ ॥
उपसंहृतदिव्याङ्गं पुरोवन्मातुरङ्कगम् ।
चलद्गोचारणं बालं नीलाभासं स्मरञ्जपेत् ॥ ८ ॥
अयुतं तावदेवाज्यैर्जुहुयाच्च हुताशने ।
स लभेदचलां भक्तिं श्रद्धां शान्तिं च शाश्वतीम् ॥ ९ ॥
मनुनैतत्समस्तान्ते मरुल्लसितशब्दतः ।
बाललीलात्मने हूंफट्नम इत्यमुनाऽथवा ॥ १० ॥

नलकूवरगायत्रीबालकृष्णा इतीरिताः ।
ऋष्याद्याः सिद्धयः सर्वाः स्युर्जपाद्यैरिहामुना ॥ ११ ॥
लङ्घिते बालशयने रुदन्तं वल्लवीजनैः ।
प्रेङ्खयमाणं दुग्धबुद्ध्या तर्पयेत् सोऽश्नुतेऽशनम् ॥ १२ ॥
अमुना वान्नरूपान्ते रसरूपपदं वदेत् ।
तुष्टिरूपनमोद्वन्द्वमन्नाधिपतये नमः ॥ १३ ॥
अन्नं प्रयच्छ स्वाहेति त्रिंशद्वर्णोऽन्नदो मनुः ।
नारदानुष्टुबन्नाधिपतयोऽस्यर्षिपूर्वकाः ॥ १४ ॥
भू(ता ? त)बालग्रहोन्मादस्मृतिभ्रंशाद्युपद्रवैः ।
पूतनास्तनपातारं ग्रस्तमूर्ध्नि स्मरञ्जपेत् ॥ १५ ॥
सासुचूषणनिर्भिन्नसर्वाङ्गीं रुदतीं च ताम् ।
आविश्य सर्वे मुक्त्वा तं विद्रवन्ति द्रुतं ग्रहाः ॥ १६ ॥
जुहुयात् खरमञ्जर्या मञ्जरीभिर्विभावसौ ।
प्रस्नातः पञ्चगव्याद्भिः पूतनाहन्तुराननेे ॥ १७ ॥
प्राशयेच्छिष्टगव्यं तत्कलशेनाभिषेचयेत् ।
साध्यं सहस्रजप्तेन सर्वोपद्रवशान्तये ॥ १८ ॥
मनुनैतद्द्वादशार्णहुंफट्स्वाहान्तिकेन वा ।
ऋष्याद्या ब्रह्मगयत्रीग्रहघ्नहरयोऽस्य तु ॥ १९ ॥
निजपादाम्बुजक्षिप्तशकटं चिन्तयञ्जपेत् ।
अयुतं मन्त्रयोरेकं सर्वविघ्नोपशान्तये ॥ २० ॥
अङ्गान्यमीषां मन्त्राणामाचक्रादिभिरर्चना ।
अङ्गैरिन्द्रादिवज्राद्यैरुदिता संपदे सदा ॥ २१ ॥
बालो नीलतनुर्दोर्भ्यां दध्युत्थं पायसं दधत् ।
हरिर्वोऽव्याद् द्वीपिनखाकिङ्किणीजालमण्डितः ॥ २२ ॥

ध्यात्वैवमग्नौ जुहुयाच्छतवीर्याङ्कुरत्रिकैः ।
पयःसर्पिःप्लुतैर्लक्षमेकं तावज्जपन् मनुम् ॥ २३ ॥
गुरवे दक्षिणां दत्त्वा भोजयेद् द्विजपुङ्गवान् ।
स ह्यब्दानां शतं जीवेन्नीरोगो नात्र संशयः ॥ २४ ॥
अत्राप्यन्यो मनुर्द्वादशार्णान्ते पुरुषोत्तमम् ।
आयुर्मे देहि संभाष्य विष्णवे प्रभविष्णवे ॥ २५ ॥
नमोऽन्तो ह्यधिकत्रिंशदर्णोऽस्यर्षिस्तु नारदः ।
छन्दोऽनुष्टुब् देवता च श्रीकृष्णोऽङ्गानि च ब्रुवे ॥ २६ ॥
रविभूतेन्द्रियवसुनेत्रार्णैश्चात्मनेयुतैः ।
महानन्दप्रतिज्योतिर्मायाविद्यापदैः क्रमात् ॥ २७ ॥
जप्त्वा लक्षमिमं मन्त्रमयुतं पायसैर्हुनेत् ।
पूर्ववद् दूर्वया जुह्वदायुर्दीर्घतरं लभेत् ॥ २८ ॥
दारयन्तं बकं दोर्भ्यां कृष्णं संगृह्य तुण्डयोः ।
स्मरन् शिशूनामातङ्के स्पृष्ट्वान्यतरमभ्यसेत् ॥ २९ ॥
तज्जप्ततिलजाभ्यङ्गाद् भवेयुः सुखिनश्च ते ।
अत्राप्यन्यो मनुर्बालवपुषे वह्निवल्लभा ॥ ३० ॥
गोरक्षायां कण्ठेणुं चारयन्तं पशूंस्तथा ।
उक्त्वा च गोपालपदं पुनर्वंशधराय च ॥ ३१ ॥
वासुदेवाय वर्म्मास्त्रशिखास्याष्टादशाक्षरः ।
मनुर्नारदगायत्रीकृष्णर्ष्यादिरनेन वा ॥ ३२ ॥
कुर्याद् गोपालसंरक्षामाचक्राद्यङ्गिना बुधः ।
कुम्भीनसादि(दये?द्वे)डार्त्तौ दष्टमूर्ध्नि स्मर(न्)हरिम् ॥ ३३ ॥
नृत्यन्तं कालीयफणामध्येऽन्यतरमभ्यसेत् ।
दृष्ट्या पीयूषवर्षिण्या सिञ्चन्तं तत्तनुं बुधः ॥ ३४ ॥

तर्जयन् वामतर्जन्या तं द्राङ् मोचयते विषात् ।
आपूर्य कलशं तोयैः स्मृत्वा कालीयमर्दनम् ॥ ३५ ॥
जप्त्वाष्टशतमासिञ्चेद् विषिणं स सुखी भवेत् ।
कालिमध्येत्य यस्यान्ते फणामध्ये(द्विव?दिव्या)र्णकान् ॥ ३६ ॥
उक्त्वा पुनर्वदेन्नृत्यं करोति तमनन्तरम् ।
नमामि देवकीपुत्रमित्युक्त्वा नृत्यशब्दतः ॥ ३७ ॥
राजानमच्युतं ब्रूयादिति दण्डलिपिर्मनुः ।
अस्याङ्गान्यङ्घ्रिभिर्व्यस्तैः समस्तैर्नारदो मुनिः ॥ ३८ ॥
छन्दोऽनुष्टुब् देवता च कृष्णः कालीयमर्दनः ।
जप्याल्लक्षं मनुवरं होतव्यं सर्पिषायुतम् ॥ ३९ ॥
अङ्गदिक्पालवज्राद्यैरर्चनास्य समीरिता ।
क्रियानेनैव वा सर्वा कर्तव्या प्रागुदीरिता ॥ ४० ॥
सदृशोऽनेन जगति नहि क्ष्वेडहरो मनुः ।
अङ्गैः शुकतरोः पिष्टैर्गुलिका धेनुवारिणा ॥ ४१ ॥
विषघ्नीपानन स्याञ्जनालेपैः साधितामुना ।
उद्दण्डवामदोर्दण्डधृतगोवर्धनाचलम् ॥ ४२ ॥
अन्यहस्ताङ्गुलिव्यक्तस्वरवंशार्पिताननम् ।
ध्यायन् हरिं जपेन्मन्त्रोरेकं छत्रं विना व्रजन् ॥ ४३ ॥
वर्षवाताशनिभ्यः स्याद्भयं तस्य नहि क्वचित् ।
मोघमेघौघयत्नापगतेन्द्रं संस्मरन् हुनेत् ॥ ४४ ॥
लोनैरयुतसंख्यं स्यादनावृष्टिर्न संशयः ।
क्रीडन्तं यमुनामध्ये मज्जनप्लावनादिभिः ॥ ४५ ॥
उच्छीकरजलासारैः सिच्यमानं प्रियाजनैः ।
ध्यात्वायुतं पयःसिक्तैर्हुनेद्वा नीरतर्पणैः ॥ ४६ ॥

वृष्टिर्भवत्यकालेऽपि महती नात्र संशयः ।
आद्यमेव स्मरन् मूर्ध्नि विषस्फोटज्वरादिभिः ॥ ४७ ॥
सदाहमोहैरार्तस्य जपेच्छान्तिर्भवेत् क्षणात् ।
अथवा गरुडारूढं बलप्रद्युम्नसंयुतम् ॥ ४८ ॥
निजज्वरविनिष्पिष्टज्वराभिष्णुतमच्युतम् ।
ध्यात्वा ज्वराभिभूतस्य मूर्ध्न्यन्यतरमभ्यसेत् ॥ ४९ ॥
शान्तिं व्रजेदसाध्योऽपि ज्वरः सोपद्रवः क्षणात् ।
ध्यात्वैवमग्नावभ्यर्च्य पयोक्तैश्चतुरङ्गुलैः ॥ ५० ॥
जुहुयादमृताखण्डैरयुतं ज्वरशान्तये ।
निशातशरनिर्भिन्नभीष्मतापहरं हरिम् ॥ ५१ ॥
स्मृत्वा स्पृशञ् जपेदार्तं पाणिभ्यां रोगशान्तये ।
अपमृत्युविनाशाय सांदीपनिसुतप्रदम् ॥ ५२ ॥
ध्यात्वामृतलताखण्डैः क्षीराक्तैरयुतं हुनेत् ।
मृतपुत्राय ददतं सुतं विप्राय सार्जुनम् ॥ ५३ ॥
ध्यात्वा लक्षं जपेदेकं मन्वोः सुतविवृद्धये ।
पुत्रजीवेन्धनचिते जुहुयादनलेऽयुतम् ॥ ५४ ॥
तत्फलैर्मधुराक्तैः स्युः पुत्रा दीर्घायुषोऽस्य तु ।
क्षीरद्रुकाथसंपूर्णमभ्यर्च्य कलशं निशि ॥ ५५ ॥
जप्त्वायुतं प्रगे नारीमभिषिञ्चेद् द्विषड्दिनम् ।
सा वन्ध्यापि सुतान् दीर्घजीविनो गदवर्जितान् ॥ ५६ ॥
लभते नात्र संदेहस्तज्जप्ताज्याशिनी सती ।
प्रातर्वाचंयमा नारी बोधिच्छदपुटैर्जलम् ॥ ५७ ॥
अष्टोत्तरशतं जप्तं मासं पुत्रीयती पिबेत् ।
देवकीसुत गोविन्द वासुदेव जगत्पते ॥ ५८ ॥

देहि मे तनयं देव त्वामहं शरणं गता ।
प्रहितां काशिराजेन कृत्यां जित्वा निजारिणा ॥ ५९ ॥
तत्तेजसा तन्नगरीं दहन्तं भावयन् हरिम् ।
सुस्नेहाक्तैर्हुनेद्रात्रौ सर्षपैः सप्तवासरम् ॥ ६० ॥
कृत्याकर्तारमेवासौ कुपितो नाशयिष्यति ।
आसीनमाश्रमे दिव्ये बदरीषण्डमण्डिते ॥ ६१ ॥
स्पृशन्तं पाणिपद्माभ्यां घण्टाकर्णकलेवरम् ।
ध्यात्वाच्युतं तिलैर्लक्षं हुनेत् त्रिमधुरप्लुतैः ॥ ६२ ॥
जपेद्वा सर्वपापानां शान्तये कान्तये तनोः ।
द्वेषयन्तं[1] रुक्मिबलौ द्यूता(श ? स)क्तौ स्मरन् हरिम् ॥ ६३ ॥
जुहुयाद् द्विष्टयोर्द्विष्ट्यै गुलिका गोमयोद्भवाः ।
ज्वलद्वह्निनिभैर्बाणैर्वर्षन्तं गरुडस्थितम् ॥ ६४ ॥
धावमानं रिपुगणमनुधावन्तमच्युतम् ।
ध्यात्वैवमभ्यसेदेकं मन्वोः सप्तसहस्रकम् ॥ ६५ ॥
उच्चाटनं भवेदेतद् रिपूणां सप्तभिर्दिनैः ।
उत्क्षिप्तवत्सकं ध्यायन् कपित्थफलहारिणम् ॥ ६६ ॥
अयुतं प्रजपेत् साध्यमुच्चाटयति तत्क्षणात् ।
आत्मानं कंसमथनं ध्यात्वा मञ्चान्निपातितम् ॥ ६७ ॥
कंसात्मानमरिं कर्षन् गतासुं प्रजपेन्मनुम् ।
अयुतं जुहुयाच्चास्य जन्मोडुतरुतर्पणैः ॥ ६८ ॥
अपि सेवितपीयूषो म्रियतेऽरिर्न संशयः ।
अथवा निम्बतैलाक्तैर्हुनेदेधोभिरक्षजैः ॥ ६९ ॥
अयुतं प्रजपेद्रात्रौ मारणाय रिपोः क्षणात् ।
दोषारिष्टदलव्योषकार्पासास्थिकणैर्निशि ॥ ७० ॥

---

१ 'न्तौ' क. पाठः ।

हुनेदेरण्डतैलाक्तैः श्मशानस्थोऽरिशान्तये ।
न शस्तं मारणं कर्म कुर्याच्चेदयुतं जपेत् ॥ ७१ ॥
हुनेद्वा पायसैस्तावच्छान्तये शान्तमानसः ।
जयकामो जपेल्लक्षं पारिजातहरं हरिम् ॥ ७२ ॥
स्मरन् पराजयस्तस्य कुतश्चिन्न भविष्यति ।
पार्थे दिशन्तं गीतार्थं व्याख्यामुद्राकरं हरिम् ॥ ७३ ॥
रथस्थं भावयञ्जप्याद् धर्मवृद्ध्यै शमाय च ।
लक्षं पालाशकुसुमैरयुतं मधुराप्लुतैः ॥ ७४ ॥
व्याख्याता सर्वशास्त्राणां सुकविर्वादिराड् भवेत् ।
विश्वरूपधरं प्रोद्यद्भास्वत्कोटिसमप्रभम् ॥ ७५ ॥
द्रुतचामीकरनिभमग्नीषोमात्मकं हरिम् ।
अर्काग्निद्योतदास्याङ्घ्रिपङ्कजं दिव्यभूषणम् ॥ ७६ ॥
नानायुधधरं व्याप्तविश्वाकाशावकाशकम् ।
राष्ट्रपूर्ग्रामवास्तूनां शरीरस्य च रक्षणे ॥ ७७ ॥
प्रजपेन्मन्त्रयोरेकतरं ध्यात्वैवमादरात् ।
अथवा व्यस्तसर्वाङ्घ्रिरचिताङ्गार्जुनर्षिकम् ॥ ७८ ॥
त्रिष्टुप्छन्दसिकं विश्वरूपविष्ण्वधिदैवतम् ।
जपेद् गीतामनुं स्थाने हृषीकेशाद्यमाज्यकैः ।
हुनेद्वा सर्वरक्षायै सर्वविघ्नोपशान्तये ॥ ७९ ॥

इति श्रीक्रमदीपिकायां (मन्त्रविनियोगप्रदर्शनं नाम)
षष्ठः पटलः ॥ ६ ॥

अथ

सप्तमः पटलः ।



व(त्वो ? द्ये)ऽन्वयधनावाप्त्यै प्रतिपत्तिं श्रियःपतेः ।
सुगुप्तां धननाथाद्यैर्धन्यैर्या क्रियते सदा ॥ १ ॥
द्वारवत्यां सहस्रार्कभास्वरैर्भवनोत्तमैः ।
अनल्पैः कल्पवृत्तैश्च परीते मणिमण्डिते ॥ २ ॥
ज्वलद्रत्नमयस्तम्भद्वारतोरणकुड्यके ।
फुल्लस्रगुल्लसच्चित्रवितानालम्बिमौक्तिके ॥ ३ ॥
पद्मरागस्थलीराजद्रत्नद्योश्च मध्यतः ।
अनारतगलद्रत्नधारस्य स्वस्तरोरधः ॥ ४ ॥
रत्नप्रदीपावलिभिः प्रदीपितदिगन्तरे ।
उद्यदादित्यसंकाशं मणिसिंहासनाम्बुजे ॥ ५ ॥
समासीनोऽच्युतो ध्येयो द्रुतहाटकसंनिभः ।
समानोदितचन्द्रार्कतडित्कोटिसमप्रभः ॥ ६ ॥
सर्वाङ्गसुन्दरः सौम्यः सर्वाभरणभूषितः ।
पीतवासाश्चक्रशङ्खगदापद्मोज्ज्वलद्भुजः ॥ ७ ॥
अनारतोच्छलद्रत्नधारौघं कलशं स्पृशन् ।
वामपादाम्बुजाग्रेण(मृष्टता ? सृजता)पल्लवच्छविम् ॥ ८ ॥
रुक्मिणीसत्यभामेऽस्य मूर्ध्नि रत्नौघधारया ।
सिञ्चन्त्यौ दक्षवामस्थे स्वदोःस्थकल(सो ? शो)त्थया ॥ ९ ॥
नाग्नजितीसुनन्दे च दिशन्त्यौ कलशौ तयोः ।
ताभ्यां च दक्षवामस्थे मित्रविन्दासुलक्षणे ॥ १० ॥

रत्ननद्योः समुद्धृत्य रत्नपूर्णौ घटौ तयोः ।
जाम्बवती सुशीला च दिशन्त्यौ दक्षवामगे ॥ ११ ॥
बहिः षोडशसाहस्रसंख्याताः परितः प्रियाः ।
ध्येयाः कनकरत्नौघधारायुक्कलशोज्ज्वलाः ॥ १२ ॥
तद्बहिश्चाष्टनिधयः पूरयन्तो धनैर्धराम् ।
तद्बहिर्वृष्णयः सर्वे पुरोवच्च सुरादयः ॥ १३ ॥
ध्यात्वैवं परमात्मानं विंशत्यर्णं मनुं जपेत् ।
चतुर्लक्षं हुनेदाज्यैश्चत्वारिंशत्सहस्रकम् ॥ १४ ॥
शक्तिश्रीपूर्वकोऽष्टादशार्णो विंशतिवर्णकः ।
[1]मन्त्रेणाऽनेन सदृशो मनुर्नहि जगत्त्रये ॥ १५ ॥
ऋषिर्ब्रह्मास्य गायत्री च्छन्दः कृष्णस्तु देवता ।
पूर्वप्रोक्तवदेवास्य बीजशक्त्यादिकल्पना ॥ १६ ॥
कल्पः सनत्कुमारोक्तो मन्त्रस्यास्योच्यतेऽधुना ।
पीठन्यासान्तिकं कृत्वा पूर्वोक्तक्रमतः सुधीः ॥ १७ ॥
करद्वन्द्वाङ्गुलितलेष्वङ्गषट्कं प्रविन्यसेत् ।
मन्त्रेण व्यापकं कृत्वा मातृकां मनुसंपुटाम् ॥ १८ ॥
संहारसृष्टिमार्गेण दश तत्त्वानि च न्यसेत् ।
पुनश्च व्यापकं कृत्वा मन्त्रवर्णांस्तनौ न्यसेत् ॥ १९ ॥
मूर्ध्नि भाले भ्रुवोर्मध्ये नेत्रयोः कर्णयोर्नसोः ।
आनने चिबुके कण्ठे दोर्मूले हृदि तुन्दके ॥ २० ॥
नाभौ लिङ्गे तथाधारे कट्यां जान्वोश्च जङ्घयोः ।
गुल्फयोः पादयोर्न्यसेत् सृष्टिरेषा समीरिता ॥ २१ ॥
स्थितिर्हृदादिपादान्ता संहृतिश्चरणादिका ।
विधायैवं पञ्चकृत्वः स्थित्यस्तं मूर्तिपञ्जरम् ॥ २२ ॥

---

१ 'मन्त्रोऽनेन सदृशोऽन्यो' क. पाठः ।

सृष्टिस्थिती च विन्यस्य षडङ्गन्यासमाचरेत् ।
गुणाग्निवेदकरणकरणाद्यक्षरैर्मनोः ॥ २३ ॥
मुद्रा बद्ध्वा किरीटाद्या दिग्बन्धं पूर्ववच्चरेत् ।
ध्यात्वा जप्त्वार्चयेद् देवं[1] मूर्तिपञ्जरपूर्वकम् ॥ २४ ॥
अथ बाह्येऽर्चयेद्विष्णुं तदर्थं यन्त्रमुच्यते ।
गोमयेनोपलिप्योर्वीं तत्र पीठं निधापयेत् ॥ २५ ॥
विलिप्य गन्धपङ्केन लिखेदष्टदलाम्बुजम् ।
कर्णिकायां तु षट्कोणं ससाध्यं तत्र मन्मथम् ॥ २६ ॥
शिष्टैस्तु सप्तदशभिरक्षरैर्वेष्टयेत् स्मरम् ।
प्राग्रक्षोऽनिलकोणेषु श्रियं शिष्टेषु संविदम् ॥ २७ ॥
षडक्षरं सन्धिषु च केसरेषु त्रिशस्त्रिशः ।
विलिखेत् स्मरगायत्रीं मालामन्त्रं दलाष्टके ॥ २८ ॥
षट्शः संलिख्य तद्बाह्ये वेष्टयेन्मातृकाक्षरैः ।
भूबिम्बं च लिखेद्बाह्ये श्रीमाये दिग्विदिक्ष्वपि ॥ २९ ॥
एतद्यन्त्रं हाटकादिपट्टेष्वालिख्य पूर्ववत् ।
साधितं धारयेद्यो वै सोऽर्च्यते त्रिदशैरपि ॥ ३० ॥
स्याद् गायत्री कामदेवपुष्पबाणौ च ङेन्तकौ ।
विद्महेधीमहियुतौ तन्नोऽनङ्गः प्रचोदयात् ॥ ३१ ॥
जप्या जपादौ गोपालमन्त्राणां जनरञ्जनी ।
नत्यन्ते कामदेवाय ङेऽन्तं सर्वजनप्रियम् ॥ ३२ ॥
उक्त्वा सर्वजनान्ते तु संमोहनपदं तथा ।
ज्वलज्वल प्रोज्ज्वलेति प्रोक्त्वा सर्वजनस्य च ॥ ३३ ॥
हृदयं मम च ब्रूयाद् वशं कुरुयुगं शिरः ।
प्रोक्तो मदनमन्त्रोऽष्टचत्वारिंशद्भिरक्षरैः ॥ ३४ ॥

---

१ 'हं' क. पाठः ।

जपादौ मारबीजाढ्यो जगत्त्रयवशीकरः ।
भूगृहं चतुरस्रं स्यादष्टशू[1]लविभूषितम् ॥ ३५ ॥
पीठं पूर्ववदभ्यर्च्य मूर्तिं संकल्प्य पौरुषीम् ।
तत्रावाह्याच्युतं भक्त्या सकलीकृत्य पूजयेत् ॥ ३६ ॥
आसनादिविभूषान्तं पुनर्न्यासक्रमाद्यजेत् ।
सृष्टिस्थितिषडङ्गं च किरीटं कुण्डलद्वयम् ॥ ३७ ॥
शङ्खचक्रगदापद्ममालाश्रीवत्सकौस्तुभान् ।
गन्धाक्षतप्रसूनैश्च मूलेनाभ्यर्च्य पूर्ववत् ॥ ३८ ॥
आदौ वह्निपुरद्वन्द्वकोणेष्वङ्गानि पूजयेत् ।
सहृच्छिरः शिखा वर्म नेत्रमस्त्रमिति क्रमात् ॥ ३९ ॥
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ।
अग्न्यादिदलमूलेषु शान्तिः श्रीश्च सरस्वती ॥ ४० ॥
रतिश्च दिग्दलेष्वर्च्या ततोऽष्टौ महिषीर्यजेत् ।
रुक्मिण्याद्या दक्षसव्यक्रमात् पत्राग्रकेषु च ॥ ४१ ॥
ततः षोडशसाहस्रं सकृदेवार्चयेत् प्रियाः ।
इन्द्रनीलमुकुन्दाद्या[2]न् मकरानन्दकच्छपान् ॥ ४२ ॥
शङ्खपद्मादिकांश्चापि निधीनष्टौ क्रमाद्यजेत् ।
तद्बहिश्चेन्द्रवज्राद्या आवृतीः संप्रपूजयेत् ॥ ४३ ॥
इति सप्तावृतिवृतमभ्यर्च्याच्युतमादरात् ।
प्रीणयेद् दधिखण्डाज्यसंमिश्रेण पयोऽधसा ॥ ४४ ॥
राजोपचारान् दत्त्वा तु स्तुत्वा नत्वा च केशवम् ।
उद्वासयेत् स्वहृदये परिवारगणैः सह ॥ ४५ ॥
न्यस्यात्मानं समभ्यर्च्य तन्मयः प्रजपेन्मनुम् ।
रत्नाभिषेके ध्यानेज्या विंशत्यर्णाश्रितेरिता ॥ ४६ ॥

१ 'वज्र' क. पाठः । २ 'ख्या' क. पाठः ।

जपहोमार्चनध्यानैर्योऽमुं प्रभजते मनुम् ।
तद्वेश्म पूर्यते रत्नैः स्वर्णधान्यैरनारतम्[1] ॥ ४७ ॥
पृथ्वी पृथ्वी करे तस्य सर्वशस्यसमाकुला ।
पुत्रैर्मित्रैः सुसंपन्नः प्रयात्यन्ते परां गतिम् ॥ ४८ ॥
वह्नावभ्यर्च्य गोविन्दं सितपुष्पैः सतण्डुलैः ।
आज्याक्तैरयुतं हुत्वा भस्म तन्मूर्ध्नि धारयेत् ॥ ४९ ॥
तस्यान्नादिसमृद्धिः स्यात्तद्वशे सर्वयोषितः ।
आज्यैर्लक्षं हुनेद्रक्तपद्मैर्वा मधुराप्लुतैः ॥ ५० ॥
श्रिया तस्यैन्द्रमैश्वर्यं तृणलेशायते ध्रुवम् ।
शुक्लादिवस्त्रलाभाय शुक्लादिकुसुमैर्हुनेत् ॥ ५१ ॥
त्रिमध्वक्तैर्दशशतमाज्याक्तैर्वाष्टसंयुतम् ।
क्षौद्रसिक्तैः सितैः पुष्पैरष्टोत्तरसहस्रकम् ॥ ५२ ॥
हुनेन्नित्यं यः स मासात्पुरोधा नृपतेर्भवेत् ।
दशाष्टादशवर्णोक्तजपध्यानहुतादिकम् ॥ ५३ ॥
विदध्यात्कर्म वानेन ताभ्यामप्यत्र कीर्तितम् ।
श्रीशक्तिस्मरकृष्णाय गोविन्दाय शिरो मनुः ॥ ५४ ॥
रव्यर्णो ब्रह्मगायत्रीकृष्णर्ष्यादिरथास्य तु ।
बीजैस्त्रिवेदयुग्मार्णैरङ्गषट्कमुदाहृतम् ॥ ५५ ॥
विंशत्यर्णोदितजपध्यानहोमार्चनक्रियाः ।
मन्त्रोऽयं सकलैश्वर्यकाङ्क्षिभिः सेव्यतां बुधैः ॥ ५६ ॥
श्रीशक्तिकामपूर्वोऽङ्गजन्मशक्तिरमान्तिकः ।
दशाक्षरः स एवादौ स्याच्चेच्छक्तिरमायुतः ॥ ५७ ॥
मन्त्रौ विकृतिरव्यर्णावाचक्राद्यङ्गिनाविमौ ।
विंशत्यर्णोक्तयजनविधी ध्यायेदथाच्युतम् ॥ ५८ ॥

---

१ 'वृतम्' क. पाठः ।

वरदाभयहस्ताभ्यां श्लिष्यन्तं स्वाङ्कगे प्रिये ।
पद्मोत्पलकरे ताभ्यां श्लिष्टं चक्रवरोज्ज्वलम् ॥ ५९ ॥
दशलक्षं जपेदाज्यैस्तावत्साहस्रहोमतः ।
सिद्धाविमौ मनू सर्वसंपत्सौभाग्यदौ नृणाम् ॥ ६० ॥
मारशक्तिरमापूर्वः शक्तिश्रीमारपूर्वकः ।
श्रीशक्तिमारपूर्वश्च दशार्णो मनवस्त्रयः ॥ ६१ ॥
एतेषां मन्त्रवर्य्याणामङ्गर्ष्यादि दशार्णवत् ।
शङ्खचक्रधनुर्बाणपाशाङ्कुशधरोऽरुणः ॥ ६२ ॥
वेणुं धमन् धृतं दोर्भ्यां ध्येयः कृष्णो दिवाकरे ।
आद्ये मनौ ध्यानमेवं द्वितीये विंशदर्णवत् ॥ ६३ ॥
दशार्णवत् तृतीयेऽङ्गदिक्पालाद्यैः समर्चना ।
पञ्चलक्षं जपेत् तावदयुतं पायसैर्हुनेत् ॥ ६४ ॥
ततः सिद्ध्यन्ति मनवो नृणां संपत्तिकामदाः ।
अष्टादशार्णो मारान्तो मनुः सुतधनप्रदः ॥ ६५ ॥
ऋष्याद्यष्टादशार्णोक्तं मारारूढस्वरैः क्रमात् ।
अङ्गान्यस्य मनोरङ्गदिक्पालाद्यैः समर्चना ॥ ६६ ॥

पाणौ पायसपक्वमाहितरसं बिभ्रन्मुवा दक्षिणे
सव्ये शारदचन्द्रमण्डलनिभं हैयङ्गवीनं दधत् ।
कण्ठे कल्पितपुण्डरीकनखसदुद्दामदीप्तिं वहन्
देवो दिव्यदिगम्बरो दिशतु नः सौख्यं यशोदाशिशुः ॥ ६७ ॥

दिनशोऽभ्यर्च्य गोविन्दं द्वात्रिंशल्लक्षमानतः ।
जप्त्वा दशांशं जुहुयात् सिताज्येन पयोऽधसा ॥ ६८ ॥
पद्मस्थं देवमभ्यर्च्य तर्पयेत् तन्मुखाम्बुजे ।
क्षीरेण कदलीपक्वैर्दध्ना हैयङ्गवेन च ॥ ६९ ॥

सुतार्थी तर्पयेद् देवं वत्सराल्लभते सुतम् ।
यद्यदिच्छति तत्सर्वं तर्पणादेव सिध्यति ॥ ७० ॥
वाग्भवं कामबीजं च कृष्णाय भुवनेश्वरी ।
गोविन्दाय रमागोपीजनवल्लभङेशिरः ॥ ७१ ॥
चतुर्दशस्वरोपेतः शुक्रः सर्गी तदूर्ध्वतः ।
द्वाविंशत्यक्षरो मन्त्रो वागीशत्वप्रदायकः ॥ ७२ ॥
अष्टादशार्णवत्सर्वमङ्गष्यादिकमस्य तु ।
पूजा च विंशत्यर्णोक्ता प्रतिपत्तिस्तु कथ्यते ॥ ७३ ॥
वामोर्ध्वहस्ते दधतं विद्यासर्वस्वपुस्तकम् ।
अक्षमालां च दक्षोर्ध्वे स्फाटिकीं मातृकामयीम् ॥ ७४ ॥
शब्दब्रह्ममयं वेणुमधः पाणिद्वयेऽङ्कितम् ।
गायन्तं पीतवसनं श्यामलं कोमलच्छविम् ॥ ७५ ॥
बर्हिबर्हकृतोत्तंसं सर्वज्ञं सर्ववेदिभिः ।
उपासितं मुनिगणैरुपतिष्ठेद्धरिं सदा ॥ ७६ ॥
ध्यात्वैवं प्रमदावेशविलासं भुवनेश्वरम् ।
चतुर्लक्षं जपेन्मन्त्रममुं मन्त्री सुसंयतः ॥ ७७ ॥
पलाशपुष्पैः स्वाद्वक्तैश्चत्वारिंशत्सहस्रकम् ।
जुहुयात् कर्मणानेन मनुः सिद्धो भवेद् ध्रुवम् ॥ ७८ ॥
योऽस्मिन् निष्णातधीर्मन्त्री वर्तते वक्त्रगह्वरात् ।
गद्यपद्यमयी वाणी तस्य गङ्गाप्रवाहवत् ॥ ७९ ॥
सर्ववेदेषु शास्त्रेषु सङ्गीतेषु च पण्डितः ।
संपत्तिं परमां लब्ध्वा चान्ते यायात् परं पदम् ॥ ८० ॥
तारं हृद्भगवान् ङेऽन्तो नन्दपुत्रपदं तथा ।
नन्दान्ते वपुषेऽस्थ्यग्निमायान्ते दशवर्णकः ॥ ८१ ॥

अष्टाविंशत्यक्षरोऽयं ब्रुवे द्वात्रिंशदक्षरम् ।
नन्दपुत्रपदं ङेऽन्तं श्यामलाङ्गपदं तथा ॥ ८२ ॥
तथा बालवपुः कृष्णगोविन्दौ दशवर्णकः ।
अनयोर्नारद ऋषिश्छन्द उष्णिगनुष्टुभौ ॥ ८३ ॥
आचक्राद्यैरङ्गमङ्गदिक्पालाद्यैस्तु पूजनम् ।
दक्षिणे रत्नचषकं वामे सौवर्णवेत्रकम् ॥ ८४ ॥
करे दधानं देवीभ्यामाश्लिष्टं चिन्तयेद्धरिम् ।
जपेल्लक्षं मनुवरौ पायसैरयुतं हुनेत् ॥ ८५ ॥
एवं सिद्धमनुर्मन्त्री त्रैलोक्यैश्वर्यभाग् भवेत् ।
तारं श्रीशक्तिबीजाढ्यं नमो भगवते पदम् ॥ ८६ ॥
नन्दपुत्रपदं ङेऽन्तं भूधरो मुखवृत्तयुक् ।
मांसान्ते वपुषे मन्त्र ऊनविंशाक्षरात्मकः ॥ ८७ ॥
ऋषिर्ब्रह्मानुष्टुप् छन्दस्तथान्यदुदितं समम् ।
अयं च सर्वसंपत्तिसिद्धये सेव्यतां मनुः ॥ ८८ ॥
तारं हृद्भगवान् ङेऽन्तो रुक्मिणीवल्लभस्तथा ।
शिरोऽन्तः षोडशार्णोऽयं रुक्मिणीवल्लभाह्वयम् ॥ ८९ ॥
सर्वसंपत्प्रदो मन्त्रो नारदोऽस्य मुनिः स्मृतः ।
छन्दोऽनुष्टुब् देवता च रुक्मिणीवल्लभो हरिः ॥ ९० ॥
एकदृग्वेदमुनिदृग्वर्णैरस्याङ्गपञ्चकम् ।

तापिच्छच्छविरङ्कगां प्रियतमां स्वर्णप्रभामम्बुज-
प्रोद्यद्वामभुजां स्ववामभुजया श्लिष्यन् सचिन्ताश्मना ।
श्लिष्यन्तीं स्वयमन्यहस्तविलसत्सौवर्णवेत्रश्चिरं
पायाद्वोऽसनसूनपीतवसनो नानाविभूषो हरिः ॥ ९१ ॥

ध्यात्वैवं रुक्मिणीनाथं जपेल्लक्षमिमं मनुम् ।
अयुतं जुहुयात्पद्मैररुणैर्मधुराप्लुतैः ॥ ९२ ॥
अर्चयेन्नित्यमङ्गैस्तं नारदाद्यैर्दिशाधिपैः ।
वज्राद्यैरपि धर्मार्थकाममोक्षाप्तये नरः ॥ ९३ ॥
लीलादण्डधरो गोपीजनसंसक्तदोःपदम् ।
दण्डान्ते बालरूपेति मेघश्यामपदं ततः ॥ ९४ ॥
भगवन् विष्णुरित्युक्तो वह्निजायान्तको मनुः ।
एकोनत्रिंशदर्णोऽस्य मुनिर्नारद ईरितः ॥ ९५ ॥
छन्दोऽनुष्टुब् देवता च लीलादण्डधरो हरिः ।
मन्वब्धिकरणाग्न्यब्धिवर्णैरङ्गक्रिया मता ॥ ९६ ॥

संमोहयन्निजकवामकरस्थलीला-
दण्डेन गोपयुवतीः पुरसुन्दरीश्च ।
दिश्यान्निजप्रियसखांसगदक्षहस्तो
देवः श्रियं निहतकंस उरुक्रमो वः ॥ ९७ ॥

ध्यात्वैवं प्रजपेल्लक्षमयुतं तिलतण्डुलैः ।
त्रिमध्वक्तैर्हुनेदङ्गं दिक्पालाद्यैः समर्चना ॥ ९८ ॥
लीलादण्डहरिं यो वै भजते नित्यमादरात् ।
स पूज्यते सर्वलोकैस्तं भजेदिन्दिरा सदा ॥ ९९ ॥
त्रयोदशस्वरोपेतः शार्ङ्गी मेदः सकेशवः ।
तथा मांसयुगं भाय शिरः सप्ताक्षरो मनुः ॥ १०० ॥
आचक्राद्यैरङ्गक्लृप्तिर्नारदोऽस्य मुनिः स्मृतः ।
छन्द उष्णिग् देवता च गोवल्लभ उदाहृतः ॥ १०१ ॥

ध्येयोऽच्युतः स कपिलागणमध्यसंस्थ-
स्तमाह्वयन् विदधद्दक्षिणदोष्णि वेणुम् ।

पाशं सयष्टिमपरत्र पयोदलीलः
पीताम्बरोऽहिरिपुपिच्छकृतावतंसः ॥ १०२ ॥
मुनिलक्षं जपेदेनं हुनेत् सप्तसहस्रकम् ।
गोक्षीरैरङ्गदिक्पालम[1]भ्येऽर्च्य गोगणाष्टकम् ॥ १०३ ॥
अष्टोत्तरसहस्रं यः पयोभिर्दिनशो हुनेत् ।
पक्षात्स गोगणैराढ्यो दशार्णेनैव वा विधिः ॥ १०४ ॥
सलवो वासुदेवो ह्नन्ङेऽन्तं च भगवत्पदम् ।
श्रीगोविन्दपदं तद्वद् द्वादशार्णोऽयमीरितः ॥ १०५ ॥
मनुर्नारदगायत्रीकृष्णर्ष्यादिरथाङ्गकम् ।
एकाक्षिवेदभूतार्णैः समस्तैरपि कल्पयेत् ॥ १०६ ॥
वन्दे कल्पद्रुमूलाश्रितमणिमयसिंहासने संनिविष्टं
नीलाभं पीतवस्त्रं करकमललसच्छङ्खवेत्रं मुरारिम् ।
गोभिः सप्रस्रवाभिर्वृतममरपतिप्रौढहस्तस्थकुम्भ-
प्रच्योतत्सौधधाराप्लपितमभिनवाम्भोजपत्राभनेत्रम् ॥ १०७ ॥
एवं ध्यात्वाच्युतं जप्त्वा रविलक्षं हुनेत्ततः ।
दुग्धैर्द्वादशसाहस्रं दिनशोऽमुं समर्चयेत् ॥ १०८ ॥
गोष्ठे प्रतिष्ठितं वात्मगेहे वा प्रतिमादिषु ।
समस्तपरिवारार्चास्ताः पुनर्विष्णुपार्षदाः ॥ १०९ ॥
द्वारे ग्रावणि पीठेऽर्च्याः पक्षीन्द्रश्च तदग्रतः ।
चण्डप्रचण्डौ प्राग् धातृविधातारौ च दक्षिणे ॥ ११० ॥
जयः सविजयः पश्चाद्बलः प्रबल उत्तरे ।
ऊर्ध्वे द्वारश्रियं चेष्ट्वा द्वार्येतान् युग्मशोऽर्चयेत् ॥ १११ ॥
पूज्यो वास्तुः पुमांस्तत्र तत्र द्वाःपीठमध्यतः ।
द्वारान्तः पार्श्वयोरर्च्या गङ्गा च यमुना नदी[2] ॥ ११२ ॥

---

१ 'भ्यर्च्य' क. पाठः । २ 'निधी' क. पाठः ।

कोणेषु विघ्नं दुर्गां च वाणीं क्षेत्रेशमर्चयेत् ।
अर्चयेद्वास्तुपुरुषं वेश्ममध्ये समाहितः ॥ ११३ ॥
तारं शार्ङ्गपदं ङेऽन्तं सपूर्वं च [1]शरासनम् ।
हुंफट्नतीरप्युक्त्वास्त्रमुद्रयाग्रस्थितो हरेः ॥ ११४ ॥
पुष्पाक्षतं क्षिपेद् दिक्षु समाहितासने ततः ।
विधेयमेतत्सर्वत्र स्थापितेषु विशेषतः ॥ ११५ ॥
आत्मार्चनान्तं कृत्वाथ गुरुपङ्क्तीः पुरोक्तवत् ।
श्रीगुरून् परमाद्यांश्च महास्मत्सर्वपूर्वकान् ॥ ११६ ॥
तत्पादुका नारदादीन् पूर्वसिद्धाननन्तरम् ।
ततो भागवतांश्चेष्ट्वा विघ्नं दक्षिणतोऽर्चयेत् ॥ ११७ ॥
पूर्ववत् पीठमभ्यर्च्य श्रीगोविन्दमथार्चयेत् ।
रुक्मिणीं सत्यभामां च पार्श्वयोरिन्द्रमग्रतः ॥ ११८ ॥
पृष्ठतः सुरभिं चेष्ट्वा केसरेष्वङ्गदेवताः ।
अर्च्या हृदादिवर्मान्ता दिक्ष्वस्त्रं कोणकेषु च ॥ ११९ ॥
कालिन्दीरोहिणीनाग्नजित्याद्याः षट् च शक्तयः ।
दलेषु पीठकोणेषु दामाद्यर्च्यास्तु किंकिणी ॥ १२० ॥
दामादीन् यष्टिवेणुं च पुरः श्रीवत्सकौस्तुभौ ।
अग्रतो वनमालां च दिक्ष्वष्टसु ततोऽर्चयेत् ॥ १२१ ॥
पाञ्चजन्यं गदां चक्रं वसुदेवं च देवकीम् ।
नन्दगोपं यशोदां च सगोगोपालगोपिकाः ॥ १२२ ॥
इन्द्राद्यान् कुमुदाद्यांश्च विष्वक्सेनं तथोत्तरे ।
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ॥ १२३ ॥
शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ।
एककालं द्विकालं वा त्रिकालं वेति गोष्ठगम् ॥ १२४ ॥

---

१ 'शरं तथा' क. पाठः ।

श्रीगोविन्दं यजेन्नित्यं गोपीभ्यश्च रसप्रदम् ।
दीर्घजीवी निरातङ्को धेनुधान्यधनादिभिः ॥ १२५ ॥
पुत्रैर्मित्रैरिहाढ्योऽन्ते प्रयाति परमं पदम् ।
ऊर्ध्वदन्तयुतः शार्ङ्गी चक्री दक्षिणकर्णयुक् ॥ १२६ ॥
मांसनाथाय नत्यन्तो मूलमन्त्रोऽष्टवर्णकः ।
ऋषिर्ब्रह्मास्य गायत्री च्छन्दः कृष्णश्च देवता ॥ १२७ ॥
वर्णयुग्मैः समस्तेन प्रोक्तं स्यादङ्गपञ्चकम् ।

पञ्चवर्षमतिदृप्तमङ्गने
धावमानमलकाकुलेक्षणम् ।
किङ्किणीवलयहारनूपुरै-
रञ्चितं स्मरत गोपबालकम् ॥ १२८ ॥

ध्यात्वैवं प्रजपेदष्टलक्षं तावत्सहस्रकम् ।
जुहुयाद् ब्रह्मवृक्षोत्थसमिद्भिः पायसेन वा ॥ १२९ ॥
प्रासादे स्थापितं कृष्णममुना नित्यमर्चयेत् ।
द्वारपूजादिपीठार्चनान्तं कृत्वोक्तमार्गतः ॥ १३० ॥
मध्येऽर्चयेद्धरिं दिक्षु विदिक्ष्वङ्गानि च क्रमात् ।
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ १३१ ॥
रुक्मिणी सत्यभामा च लक्ष्मणा जाम्बवत्यपि ।
दिग्विदिक्ष्वर्चयेदेतानिन्द्रवज्रादिकान् बहिः ॥ १३२ ॥
योऽमुं मन्त्रं जपेन्नित्यं विधिनाभ्यर्चयन् हरिम् ।
स सर्वसंपत्संयुक्तो नित्यं शुद्धपदं व्रजेत् ॥ १३३ ॥
तारश्रीशक्तिमारान्ते श्रीकृष्णाय पदं वदेत् ।
श्रीगोविन्दाय तस्योर्ध्वं श्रीगोपीजन इत्यपि ॥ १३४ ॥
वल्लभाय ततस्त्रिः श्रीं सिद्धगोपालको मनुः ।
माधवीमण्डपासीनौ गरुडेनाभिपालितौ ॥ १३५ ॥

दिव्यक्रीडासु निरतौ रामकृष्णौ स्मरञ्जपेत् ।
चक्री वसुस्वरयुतः सर्गयैकार्णो मनुर्मतः ॥ १३६ ॥
कृष्णेति द्व्यक्षरः कामपूर्वस्त्र्यर्णः स एव तु ।
स एव चतुर्वर्णः स्यात् ङेऽन्तोऽन्यश्चतुरक्षरः ॥ १३७ ॥
वक्ष्यते पञ्चवर्णः स्यात्कृष्णाय नम इत्यपि ।
कृष्णायेति स्मरद्वन्द्वमध्ये पञ्चाक्षरोऽपरः ॥ १३८ ॥
गोपालायाग्निजायाभ्यां षडक्षर उदाहृतः ।
कृष्णाय स्मरबीजाद्यो वह्निजायान्तिकोऽपरः ॥ १३९ ॥
षडक्षरः प्रागुदितः कृष्णगोविन्दकौ पुनः ।
सचतुर्थी सप्तवर्णः सप्तार्णोऽन्यः पुरोदितः ॥ १४० ॥
श्रीशक्तिमारकृष्णायमारः सप्ताक्षरो मनुः ।
कृष्णगोविन्दकौ ङेन्तौ स्मराद्यावष्टवर्णकः ॥ १४१ ॥
दधिभक्षणङेवह्निजायाभिरपरोऽष्टकः ।
सुप्रसन्नात्मने प्रोक्तो नम इत्यपरोऽष्टकः ॥ १४२ ॥
प्राक्प्रोक्तो मूलमन्त्रश्च नवार्णः स्मरसंयुतः ।
कृष्णगोविन्दकौ ङेन्तौ नमोन्तोऽन्यो नवार्णकः ॥ १४३ ॥
क्लींग्लौंक्लींश्यामलाङ्गाय नमः स्याद् दशवर्णकः ।
शिरोन्तो बालवपुषे कृष्णायान्यो मनुर्मतः ॥ १४४ ॥
शिरोन्तो बालवपुषे क्लींकृष्णाय स्मृतो बुधैः ।
एकादशाक्षरो मन्त्र एतेषां नारदो मुनिः ॥ १४५ ॥
छन्दस्तु देवी गायत्री देवता कृष्ण ईरितः ।
कलषद्दीर्घकैरङ्गा[1]न्यथामुं चिन्तयेद्धरिम् ॥ १४६ ॥
अव्याद् व्याकोषनीलाम्बुजरुचिररुणाम्भोजनेत्रोऽम्बुजस्थो
बालो जङ्घाकटीरस्थलकलितरणत्किङ्किणीको मुकुन्दः ।

१ 'ङ्गम' क. पाठः ।

दोर्भ्यां हैयङ्गवीनं दधदतिविमलं पायसं विश्ववन्द्यो
गोगोपीगोपवीतो रुरुनखविलसत्कण्ठभूषश्चिरं वः ॥ १४७ ॥
ध्यात्वैवमेकमेतेषां लक्षं जप्यान्मनुं ततः ।
सर्पिःसितोपलोपेतैः पायसैरयुतं हुनेत् ॥ १४८ ॥
तर्पयेत् तावदेतेषां मनूनां हुतसंख्यया ।
तर्पणं विहितं नित्यं योऽर्चयेत् सुसमाहितः ॥ १४९ ॥
वह्न्यादीशान्तमङ्गानि हृदादिकवचान्तिकम् ।
अर्चयेत् पुरतो नेत्रम(न्त्रं ? स्त्र)दिक्षु बहिः पुनः ॥ १५० ॥
इन्द्रवज्रादिकाः पूज्याः सपर्यैषां समीरिता ।
इत्येकमेषां मन्त्राणां भजेद्यो मनुवित्तमः ॥ १५१ ॥
करप्रचेयाः सर्वार्थास्तस्यासौ पूज्यते नरैः ।
सद्यःफलप्रदं मन्त्रं वक्ष्येऽन्यं चतुरक्षरम् ॥ १५२ ॥
संप्रोक्तो मारयुग्मान्तरस्थकृष्णपदेन तु ।
ऋष्याद्यमङ्गषट्कं च प्रागुक्तं प्रोक्तमस्य तु ॥ १५३ ॥
श्रीमत्कल्पद्रुमूलोद्गतकमललसत्कर्णिकासंस्थितो य-
स्तच्छाखालम्बिपद्मोदर[1]विसरदसंख्यातरत्नाभिषिक्तः ।
हेमाभः सुप्रभाभिस्त्रिभुवनमखिलं भासयन् वासुदेवः
पायद्वाः पायसादो नवनवनवतीतामृताशी वशी सः ॥ १५४ ॥
ध्यात्वैवं प्रजपेल्लक्षचतुष्कं जुहुयात् ततः ।
त्रिमध्वक्तैर्बिल्वफलैश्चत्वारिंशत्सहस्रकम् ॥ १५५ ॥
अङ्गैर्निधिभिरिन्द्राद्यैर्वज्राद्यैरर्चनोदिता ।
तर्पयेद् दिनशः कृष्णं स्वादुत्रयधिया जलैः ॥ १५६ ॥
मारयोरस्य मांसाधो रक्तं चेद्परो मनुः ।
षडङ्गान्यस्य क[2]लषड्दीर्घैर्मन्त्रशिखामणेः ॥ १५७ ॥

---

१ 'बिसरसं' क. पाठः । २ 'कल्प्यानि' क. पाठः ।

आरक्तोद्यानकल्पद्रुमशिखरलसत्स्वर्णदोलाधिरूढं
गोपीभ्यां प्रेङ्ख्यमाणं विकसितनवबन्धूकसिन्दूरभासम् ।
बालं लोलालकान्तं कटितटविलसत्क्षुद्रघण्टाघटाढ्यं
वन्दे शार्दूलकामाङ्कुशलसितगदाकल्पदीप्तं मुकुन्दम् ॥ १५८ ॥
ध्यात्वैवं पूर्वक्लृप्त्यैनं जप्त्वा राजोत्पलैर्नवैः ।
मधुत्रययुतैर्हुत्वा तर्पयेत् पूर्ववद्धरिम् ॥ १५९ ॥
मधुरत्रयसंयुक्तामारक्तां शालिमञ्जरीम् ।
जुहुयान्नित्यशोऽष्टोर्ध्वशतमेकेन मन्त्रयोः ॥ १६० ॥
अस्य मण्डलतः पृथ्वी पृथ्वीशस्य कुलाकुला ।
स्याच्छालिपुञ्जपूर्णं च तद्देशमाशु प्रजायते ॥ १६१ ॥
यश्चैतयोर्नियतमन्यतरं भजेत
मन्वोर्जपार्चनहुतादिभिरात्मभक्तिः ।
श्रीमान् स मन्मथ इव प्रमदासु वाग्मी
भूयात् तनोर्विपदि तच्च महाच्युताख्यम् ॥ १६२ ॥

इति श्रीक्रमदीपिकायां(काम्यप्रयोगान्तरतन्मन्त्रभेदनिर्णयनिरूपणं) नाम
सप्तमः पटलः ॥ ७ ॥

अथ

अष्टमः पटलः ।



अथोच्यते वश्यविधिः पुरोक्त-
दशार्णतोऽष्टादशवर्णतश्च ।
स्मृत्यैव यौ सर्वजगत्प्रियत्वं
मनू मनुज्ञस्य सदा विधत्तः ॥ १ ॥

फुल्लैर्वन्यप्रसूनैरसुममलतरैरर्चयित्वा दिनादौ
नित्यं नित्यक्रियायां रतमथ दिनमध्योक्तक्लृप्त्या मुकुन्दम् ।
अष्टोपेतं सहस्रं दशलिपिमनुवर्यं जपेद्यः स मन्त्री
कुर्याद् वश्यान्यवश्यं मुखरमुखतरान्मण्डलान्मण्डलानि ॥ २ ॥

जातीप्रसूनैर्वरगोपवेशं
क्रीडारतं रक्तहयारिपुष्पैः ।
नीलोत्पलैर्गीतिरतं पुरोव-
दिष्ट्वा नृपादीन् वशयेत् क्रमेण ॥ ३ ॥

सितकुसुमसमेतैस्तण्डुलैराज्यसिक्तै-
र्दशशतमथ हुत्वा नित्यशः सप्तरात्रम् ।
कचभुवि च ललाटे भस्म तद्धारयेद् यो
वशयति युवतीः स्त्रीः सापि नॄंस्तद्वदेव ॥ ४ ॥

ताम्बूलवस्त्रकुसुमाञ्जनचन्दनाद्यं
जप्तं सहस्रतरमन्यतरेण मन्वोः ।
यस्मै दधाति मनुवित्स नरोऽस्य मङ्क्षु
स्यात् किङ्करो न खलु तत्र विचारणीयम् ॥ ५ ॥

राजद्वारे व्यवहारे सभायां
द्यूते वादे वाष्टयुक्तं शतं यः ।
जप्त्वा वाचं प्रथमामीरयेद्वै
वर्तेतासौ तत्र तत्रोपरिष्टात् ॥ ६ ॥

आसीनं मुरमथनं कदम्बमूले
गायन्तं मधुरतरं व्रजाङ्गनाभिः ।
स्मृत्वाग्नौ मधुमिलितैर्मयूरकेध्मै-
र्हुत्वासौ वशयति मन्त्रवित् त्रिलोकीम् ॥ ७ ॥

रासमध्यगतमच्युतं स्मरन्
यो जपेद् दशशतं दशाक्षरम् ।
नित्यशो झटिति मासतो नरो
वाञ्छितामभिवहेत् स कन्यकाम् ॥ ८ ॥

तुङ्गकुञ्जमधिरूढमच्युतं
या विचिन्त्य दिनशः सहस्रकम् ।
साष्टकं जपति सा हि मण्डलाद्
वाञ्छितं वरमुपैति कन्यका ॥ ९ ॥

नृत्यन्तं व्रजसुन्दरीजनकराम्भोजानि संगृह्य तं
ध्यात्वाष्टादशवर्णकं मनुवरं लक्षं जपेन्मन्त्रवित् ।
लाजानामथवा मधुद्रुततरैर्हुत्वायुतं कर्णकै-
रूढोढुं प्रजपेच्च तावदचिरादाकाङ्क्षितां कन्यकाम् ॥ १० ॥

अष्टादशाक्षरेण द्विजतरुजैस्तर्पणैस्त्रिमध्वक्तैः ।
अयुतं कुशैस्तिलैर्वा सतण्डुलैर्वशयितुं द्विजाञ्जुहुयात् ॥ ११ ॥

कृतमालभवैश्च कुरुण्टकजै-
र्नृपतीन् बकुलैश्च कुरुण्टकजैः ।

विशमत्त्वभवैरपि पाटलजै-
रितरानपि तद्वदथो वशयेत् ॥ १२ ॥
अभिनवैः कमलैररुणोत्पलैः
समधुरैरपि चम्पकपाटलैः ।
प्रतिहुनेद्युतं क्रमशोऽचिरद्
वशयितुं मुखजादिवराङ्गनाः ॥ १३ ॥
हयारिकुसुमैर्नवैस्त्रिमधुराप्लुतैर्नित्यशः
सहस्रमृषिवासरं प्रनिहुनेन्निशीथे बुधः ।
सुगर्वितधियं हठाद्झटिति वारयोषामसौ
करोति निजकिङ्करीं स्मरशिलीमुखैरर्दिताम् ॥ १४ ॥
कटुसंयुतैस्त्रिमधुरार्द्रतरैः
सितसर्षपैर्दशशतत्रितयम् ।
निशि जुह्वतोऽस्य तु शचीदयितो-
ऽप्यवशो वशो भवति किं न प(रैः?रे) ॥ १५ ॥
अथ बिल्वजैः फलसमित्प्रसव-
च्छदनैर्मधुद्रुततरैर्हवनात् ।
कमलैः सिता(च?घृ)तयुतैश्च···(?)
कमलां चिराय वशयेदचिरात् ॥ १६ ॥
अपहृत्य गोपवनिताम्बराण्यमा
हृदयैः कदम्बमधिरूढमच्युतम् ।
प्रजपेत् स्मरन्निशि सहस्रमानयेद्
वशमुर्वशीमपि हठाद् दशाहतः ॥ १७ ॥
बहुना किमत्र कथितेन मन्त्रयो-
रनयोः सदृङ् नहि परो वशीकृतौ ।

अपि कृष्टिकर्मणि विदग्धयोषितां
कुसुमायुधास्त्रमयवर्ष्मणोरिह ॥ १८ ॥

वन्दे कुन्देन्दुगौरं तरुणमरुणपाथोजपत्राभनेत्रं
शङ्खं चक्रं गदाब्जं निजभुजपरिघैरायतैरादधानम् ।
दिव्यैर्भूषाङ्गरागैर्नवनलिनलसन्मालया च प्रदीप्तं
द्योतत्पीताम्बराढ्यं मुनिभिरभिवृतं पद्मसंस्थं मुकुन्दम् ॥ १९ ॥

एवं ध्यात्वा पुमांसं स्फुटहृदयसरोजासनासीनमाद्यं
सान्द्राम्भोजच्छविं वा द्रुतकनकनिभं वा जपेदर्कलक्षम् ।
मन्वोरेकं द्वितारान्तरितमथ हुनेदर्कसाहस्रमिध्मैः
क्षीरद्रूत्थैः पयोक्तैः समधुघृतसितेनापि वा पायसेन ॥ २० ॥

ततो लोकाध्यक्षं ध्रुवचितिसदानन्दवपुषं
निजे हृत्पाथोजे भवतिमिरसंभेदमिहिरम् ।
निजैक्येन ध्यायन्नमुममलचेताः प्रतिदिनं
त्रिसाहस्र्यं जप्यात् प्रयजतु च सायाह्नविधिना ॥ २१ ॥

विधिं योऽमुं भक्त्या भजति नियतं सुस्थिरमति-
र्भवाम्भोधिं भीमं विषमविषयग्राहनिकरैः ।
तरङ्गैरुत्तुङ्गैर्जनिमृतिसमाख्यैः प्रविततं
समुत्तीर्यानन्दं व्रजति परमं धाम स हरेः ॥ २२ ॥

गृणंस्तस्य नामानि शृण्वंस्तदीयाः
कथाः संस्मरंस्तस्य रूपाणि नित्यम् ।
नमंस्तत्पदाम्भोरुहं भक्तिनम्रः
स पूज्यो बुधैर्नित्यमुक्तः स एव ॥ २३ ॥

वक्ष्ये मनुद्वयमथातिरहस्यमन्यत्
संक्षेपतो भुवनमोहननामधेयम् ।

ब्राह्मेन्द्रवामनयनेन्दुभिरादिमोऽन्य-
स्तत्पूर्वको वियदृषीकयुतेशङेह्हत् ॥ २४ ॥
मन्वोस्तु संमोहननारदो मुनि-
श्छन्दस्तु गायत्र्य[1]मुदीरितं बुधैः ।
त्रैलोक्यसंमोहनविष्णुरेतयोः
स्याद् देवता वच्म्यधुना षडङ्गकम् ॥ २५ ॥
अक्लीवकलादीर्घैः सलवैस्तदपि कल[2]समधिरूढैः ।
उक्तं पूर्ववदासनविन्यासान्तं समाचरेदथ तु ॥ २६ ॥
करयोः शाखासु तले न्यस्य षडङ्गानि चाङ्गुलीषु शरान् ।
मनुपुटितमातृकार्णैर्न्यस्याङ्गेऽङ्गानि विन्यसेच्च शरान् ॥ २७ ॥
कास्यहृदन्ध्वङ्घ्रिषु करशाखाभिस्तान्नमोऽन्तिकान् ङेन्तान् ।
शोषणमोहनसंदीपनतापनमादनादिकान् क्रमशः ॥ २८ ॥
पञ्चैते संप्रोक्ता द्रांद्रींक्लींब्लूंसआदिकरणाः ।
संमोहनमथ जगतां ध्यायेत्पुरुषोत्तमं समाहितधीः ॥ २९ ॥
दिव्यतरूद्यानान्तारुचिरमहाकल्पपादपाधस्तात् ।
मणिमयभूतलविलसद्रत्नपयोजन्मपीठनिविष्टस्य ॥ ३० ॥
विश्वप्राणस्योद्यत्प्रद्योतनसद्युतेः सुपर्णस्य ।
आसीनमुन्नतांसे पारिद्रुमभद्राङ्गमङ्गजोन्मथितम् ॥ ३१ ॥
चक्रदराङ्कुशपाशान् सुमनोबाणेक्षुचापकमलगदाः ।
दधतं स्वदोर्भिररुणायतविपुलविघूर्णिताक्षियुगनलिनम् ॥ ३२ ॥
मणिमयकिरीटकुण्डलहाराङ्गदकङ्कणोर्मिरसनाद्यैः ।
अरुणैर्माल्यविलेपैश्चादीप्तं पीतवस्त्रपरिधानम् ॥ ३३ ॥
निजवामोरुनिषण्णां श्लिष्यन्तीं वामहस्तधृतनलिनाम् ।
क्लिद्यद्योनिं कमलां मदनमदव्याकुलोज्ज्वलाङ्गलताम् ॥ ३४ ॥

१ 'त्र' क. पाठः । २ 'लासमा' क. पाठः ।

सुरुचिरभूषणमाल्यानुलेपनां सुसितवसनपरिवीताम् ।
निजमुखकमलव्यापृतचटुलासितनयनमधुकरां तरुणीम् ॥ ३५ ॥
श्लिष्यन्तं वामभुजादण्डेन दृढं धृतेक्षुचापेन ।
तज्जनितपरमनिर्वृतिनिर्भरहृदयं चराचरैकगुरुम् ॥ ३६ ॥
सुरदितिजभुजगगुह्यकगन्धर्वाद्यङ्गनाजनसहस्रैः ।
मदमन्मथालसाङ्गैरभिवीतं दिव्यभूषणोल्लसितैः ॥ ३७ ॥
स्वात्माभेदतयेत्थं ध्यात्वैकाक्षरमथाष्टवर्णं वा ।
प्रजपेद्दिनकरलक्षं त्रिमधुरसिक्तैश्च किंशुकप्रसवैः ॥ ३८ ॥
जुहुयादर्कसहस्रं विमलैः सलिलैश्च तर्पयेत्तावत् ।
विंशत्यर्णप्रोक्ते यन्त्रे दिनशोऽमुमर्चयेद् भक्त्या ॥ ३९ ॥
पीठा[1]वधौ पद्मन्ते राजाय शिरोऽमुनाभिपूज्य विपम् ।
हरिमभिवाह्य स्कन्धे तस्याघ्यर्याद्यैः समर्च्य धूपान्तैः ॥ ४० ॥
अङ्गानि बाणांश्च न्यासक्रमतः किरीटमपि शिरसि ।
श्रवसोश्च कुण्डलेऽरिप्रमुखानि प्रहरणानि पाणिषु ॥ ४१ ॥
श्रीवत्सकौस्तुभौ च स्तनयोरूर्ध्वे गले च वनमालाम् ।
पीतवसनं नितम्बे वामाङ्के श्रियमपि स्वबीजेन ॥ ४२ ॥
इष्ट्वाथ कर्णिकायामङ्गानि विदिग्दिशासु दिक्षु शरान् ।
कोणेषु पञ्चमं पुनरग्न्यादिदलेषु शक्तयः पूज्याः ॥ ४३ ॥
लक्ष्मीः सरस्वती च स्वर्णाभे अरुणतरे रतिप्रीत्यौ ।
कीर्तिः शान्तिश्च सिते तुष्टिः पुष्टिश्च मरकतप्रतिमे ॥ ४४ ॥
दिव्याङ्गरागमरकतभूषणमाल्यदुकूलैरलंकृताङ्गलताः ।
स्मेराननाः स्मरार्ता धृतचामरचारुकरतला एताः ॥ ४५ ॥
लोकेशा बहिरर्च्याः कथितेत्यर्चना मनुद्वयोद्धृता ।
प्रायः पुरुषोत्तमविधिरेवमिह स नोच्यते बहूक्तत्वात् ॥ ४६ ॥

---

१ 'ठाधः' क. पाठः ।

त्रैलोक्यमोहनायेत्युक्त्वा विद्महे इति स्वराय ततः ।
धीमहि पदमित्युक्त्वा तन्नो विष्णुस्तदनु प्रचोदयात् ॥ ४७ ॥
जप्यैषा जपादौ दुरितहरी श्रीकरी जपार्चाहवनैः ।
प्रोक्षयतु शुद्धिविधयेऽर्चायामनयात्मयागभूद्रव्याणि ॥ ४८ ॥
मन्वोरेकेन शतं प्रतर्पयेन्मोहिनीप्रसूनयुतैर्यः ।
तोयैर्दिनशः प्रातः स तु लभते वाञ्छितानयत्नात्कामान् ॥ ४९ ॥
हुत्वायुतं हुताशे संपाताज्येन तावदभिजप्तेन ।
भोजयतु स्वमभीकं रमणी रमणोऽपि तां स्ववशतां नेतुम् ॥ ५० ॥
अष्टादशार्णविहिता विधयः कार्याश्च वश्यकृत आभ्याम् ।
मन्वोरनयोः सदृशोऽन्यो नाशु त्रैलोक्यवश्यकर्मणि जगति ॥ ५१॥
अत्रैकार्णजपादावथवा कृष्णः सवेणुगीतिर्ध्येयः ।
अरुणरुचिराङ्गवेशः कन्दर्पो वा सपाशसृणिचापेषुः ॥ ५२ ॥
यस्त्वेकतरं मनुमेतयोर्विमलधीः सदा जपति मन्त्री ।
सोऽमुत्रेहापि च सिद्धिं विपुलामतितरामेति ॥ ५३ ॥

अथ सत्यशौरिचतृतीयतुर्यकाः
शिखिवामनेत्रशशिखण्डमण्डिताः ।
जय कृष्णयुग्मनिरन्तरात्मभू-(?)
शिखिशन्तिडास्यवृत्तसक्तवर्णकाः ॥ ५४ ॥

प्रनिमध्यगे मुदितचेतसे तत-
स्त्यपरदृ(ग्मगुरु ? ग्यमुख)मारुताक्षराः ।
सचतुर्थिकृष्णपदमिक्षुकार्मुको
दशवर्णकश्च मनुवर्यकस्त्वसौ ॥ ५५ ॥

सलवाधराचलसुतारमाक्षरैः
पुटितं क्रमोत्क्रमगतैः समुद्गकम् ।

इति दन्तसूर्यवसुवर्ण उद्धृतः
कवितानुरञ्जनरमाकरोऽघहृत् ॥ ५६ ॥

मुखवृत्तनन्दयुतनारदो मुनि-
स्त्विह छन्द उक्तममृतादिका विराट् ।
त्रिजगद्विमोहनसमाह्वयो हरिः
खलु देवतास्य मुनिभिः समीरिता ॥ ५७ ॥

वसुमित्रभूधरगजात्मदिङ्मयै-
र्मनुवर्णकैस्त्रिपुटसंस्थितैः पृथक् ।
निजजातियुङ् निगदितं षडङ्गकं
क्रिययैव तत्खलु जनानुरञ्जनम् ॥ ५८ ॥

अथ संविशोध्य तनुमुक्तमार्गतः
प्रचय्य पीठमथ च स्ववर्ष्मणा ।
करयोर्दशाक्षरविधिक्रमान्न्यसेत्
सषडङ्गसायकमनङ्गपञ्चकम् ॥ ५९ ॥

अमुना त्रिशो न्यसतु सर्वतस्तनौ
स्मरसंपुटैस्तदनु मातृकाक्षरैः ।
दशतत्त्वकादिदशवर्णकीर्तितं
त्वथ मूर्तिपञ्जरवसानमाचरेत् ॥ ६० ॥

सृजतिस्थिती दश षडङ्गसायकान्
न्यसतात् ततोऽन्यदखिलं पुरोक्तवत् ।
प्रणिधाय सर्वभुवनैकसाक्षिणं
स्मरतां मुकुन्दमनवद्यधीरधीः ॥ ६१ ॥

अथ भूधरोदरपरि(स्कृ ? ष्कृ)ते महो-
न्नतशालगोपुरविशालवीथिके ।

घनचुम्ब्युदग्रसितसौधसंकुले
मणिहर्म्यविस्तृतकपाटवेदिके ॥ ६२ ॥
द्विजभूपविट्चरणजन्मनां गृहै-
र्विविधैश्च शिल्पिजनवेश्मभिस्तथा ।
इभसप्त्युरभ्रखरधेनुसेवितै-
श्छगलालयैश्च लसितैः सहस्रशः ॥ ६३ ॥
विविधापणाश्रितमहाजनैः कृत-
क्रयविक्रयद्रविणसंचयाचिते ।
जनमानसंहृतिविदग्धसुन्दरी-
जनमन्दिरैः सुरुचिरैश्च मण्डिते ॥ ६४ ॥
पृथुदीर्घिकाविमलपाथसि द्रव-
द्विकचारविन्दमकरन्दलम्पटैः ।
कलहंससारसरथाङ्गनामभि-
र्विहगैर्विघुष्टककुभि स्वके पुरे ॥ ६५ ॥
सुरपादपैः सुरभिपुष्पलोलुप-
भ्रमराकुलैर्विविधकामदे नृणाम् ।
शिवमन्दमारुतललच्छिखैर्वृते
मणिमण्डपे रविसहस्र(सं)श्रिते ॥ ६६ ॥
मणिदीपिकानिकरदीपितान्तरे
तनुचित्रविस्तृतवितानशालिनि ।
लसिते विकस्वरविचित्रदामभिः
[1]ससुगन्धिशीतसलिलोक्षितस्थले ॥ ६७ ॥
प्रमदाशतैर्मदविघूर्णितेक्षणै-
र्मदनालसैः करविलोलचामरैः ।

१ 'सु' क. पाठः ।

अभि(षेचि ? सेवि)ते स्खलितमञ्जुभाषितैः
स्तनभारभङ्गुरकृशावलग्नकैः ॥ ६८ ॥

अविरामचित्रमणिवर्यवर्षिणः
अमहानिदामृतरसच्युतोऽप्यधः ।
सुरपादपस्य मणिभूतलोल्लस-
त्पृथुसिंहवक्त्रचरणाम्बुजासने ॥ ६९ ॥

अभिचिन्तयेत् समुपविष्टमच्युतं
नवनीलनीररुहकोमलच्छविम् ।
कुटिलाग्रकुन्तललसत्किरीटकं
सितरत्नपुष्पकलितावतंसकम् ॥ ७० ॥

सुललाटमुल्लसदुदञ्चितभ्रुवं
विपुलारुणायत(वि)लोललोचनम् ।
मणिकुण्डलोस्रपरिदीप्तगण्डकं
नवबन्धुजीवकुसुमारुणाधरम् ॥ ७१ ॥

स्मितचन्द्रिकोज्ज्वलितदिङ्मुखं स्फुर-
त्प्रनखं श्रमाम्बुकणमण्डिताननम् ।
स्फुरदंशुरत्नगणदीप्तभूषणो-
त्तमहारदामभिरुपस्कृतांसकम् ॥ ७२ ॥

घनसारकुङ्कुमविलिप्तविग्रहं
पृथुदीर्घबन्धुरभुजाविराजितम् ।
तरुणारुणाब्जचरणाब्जमङ्गजो-
न्मथिताङ्गमङ्कगकराम्बुजद्वयम् ॥ ७३ ॥

स्वाङ्कस्थभीष्मकसुतोरुयुगान्तरस्थं
तां तप्तहेमरुचिमात्मकराम्बुजाभ्याम् ।

श्लिष्यन्तमर्द्रजघनामुपगृह्यमाणा-
मात्मानमायतलसत्करपल्लवाभ्याम् ॥ ७४ ॥

आनन्दोद्रेकनिम्नां मुकुलितनयनेन्दीवरां स्रस्तगात्रीं
प्रोद्यद्रोमाश्वसान्द्रश्रमजलकणिकामौक्तिकालङ्कृताङ्गीम् ।
आत्मन्या(नीय ? लीन)बाह्यान्तरकरणगणामङ्ककैर्निस्तरङ्गै-
र्मज्जन्तं लीननानामतिमतुलमहानन्दसन्दोहसिन्धौ ॥ ७५ ॥

सत्याजाम्बुवतीभ्यां दिव्यदुकूलानुलेपना(ढ्या ?)भ्याम् ।
मन्मथशरमथिताभ्यां मुखकमलालोललोचनभ्रमराभ्याम् ॥ ७६ ॥
भुजयुगलाश्लिष्टाभ्यां श्यामारुणललितकोमलाङ्गा[1]भ्याम् ।
आश्लिष्टमात्मदक्षिणवामगताभ्यां करोल्लसत्कमलाभ्याम् ॥ ७७ ॥

पृष्ठगया कलिन्दसुतया करकमलयुजा परिबद्धमञ्जुलरुचा मदन-
मथितया ।
पद्मगदारथाङ्गदरभृद्भुजयुगं दोर्द्वयसक्तवंशविलसन्मुखसरसीरुहम् ।
॥ ७८ ॥

दिक्षु बहिः श्रुतर्षियतिभिः खेचरपरिवृढैर्भक्तिभरावनम्रतनुभिः
स्तुतिमुखरमुखैः ।
सन्ततसेव्यमानममनोवचनविषयकमर्थचतुष्टयप्रदममुं त्रिभुवन-
जनकम् ॥ ७९ ॥

सान्द्रानन्दमहाब्धिमग्नममले धाम्नि स्वकेऽवस्थितं
ध्यात्वैवं परमं पुमांसमनघात् संप्राप्य दीक्षां गुरोः ।
लब्ध्वामुं मनुमादरेण सितधीर्लक्षं जपेद्योषितां
वार्ताकर्णनदर्शनादि(वि ? र)हितो मन्त्री गुरूणामपि ॥ ८० ॥

जुहुयाच्च दशांशकं हुताशे
ससिताक्षौद्रघृतेन पायसेन ।

१ 'ङ्गलताभ्याम्' क. पाठः ।

प्रथमोदितपीठवर्यकेऽमुं
प्रयजेन्नित्यमनित्यताविमुक्त्यै ॥ ८१ ॥

आरभ्य विभूतिमथ न्यासक्रमतः शरान्तमभ्यर्च्य ।
मूर्त्याद्यं चात्मानं विंशत्यर्णोदिते तु यन्त्रवरे ॥ ८२ ॥
मध्यमबीजं परितो वरुणेन्दुयमेन्द्रदिक्षु संलिख्य ।
बीजचतुष्कं तदपि चत्वारिंशद्भिरक्षरैर्द्व्यधिकैः ॥ ८३ ॥
शिवहरिवह्न्याशास्त्रिषु ···क्रमाद्विलिखेत् ।
वाङ्मायाश्रीमन्त्रांस्तद्वद् रक्षोऽम्बुपानिलास्त्रिषु च ॥ ८४ ॥
शेषं पूर्वोदितवद्विधाय पीठं यथावदभ्यर्च्य ।
सङ्कल्प्य मूर्तिमन्तर्बाह्यां वार्चयतु मध्यबीजे तम् ॥ ८५ ॥
मुखदक्षसव्यपृष्ठबीजेष्वर्च्यास्तु शक्तयः क्रमशः ।
रुक्मिण्याद्याः षट्स्वथ कोणेष्वङ्गानि केसरेषु शरान् ॥ ८६ ॥
लक्ष्म्याद्या दलमध्येष्वग्न्यादिषु तद्बहिर्ध्वजप्रमुखान् ।
अग्रे केतुं श्यामं पृष्ठे विधुरिपुमरुणममलरक्तरुची ॥ ८७ ॥
पार्श्वद्वये निधीशौ सन्ततधाराभिवृष्टधनपुञ्जौ ।
हेरम्बशास्तृदुर्गावि(ख ? ष्व)क्सेनान् विदिक्षु वह्न्याद्यम् ॥ ८८ ॥
विद्रुममरकतदूर्वास्वर्णाभान् बहिरथेन्द्रवज्राद्यान् ।
यजतु विधानमितीरितमावृतिसप्तकयुतं मुकुन्दस्य ॥ ८९ ॥

इत्यर्चयन्नच्युतमादरेण
योऽमुं भजेन्मन्त्रवरं जितात्मा ।
सोऽभ्यर्च्यते दिव्यजनैर्जनानां
हृन्नेत्रपङ्केरुहतिग्मभानुः ॥ ९० ॥

सितशर्करोत्तरपयःप्रतिपत्त्या
परितर्पयेद् दिनमुखे दिनशस्तम् ।

सलिलैः शतं शतमखश्रियमेव
स्वविभूत्युदन्वति करोत्युदबिन्दुम् ॥ ६१ ॥
विदलाकुलैः सुमनसः सुमनोभि-
र्घनसारचन्दनघनद्रवमग्नैः ।
मनुनामुना हवनतोऽयुतसंख्यं
त्रिजगत्प्रियः स मनुवित् कविराट् स्यात् ॥ ६२ ॥
ध्यानादेवास्य सद्यस्त्रिदशमृगदृशो वश्यतां यान्त्यवश्यं
कन्दर्पार्ता जपाद्यैः किमथ न सुलभं मन्त्रतः स्यान्नरस्य ।
स्पर्धामुद्धूय चित्रं महदिदमपि नैसर्गिकीं शश्वदेतं
सेवेते मन्त्रिमुख्यं सरसिजनिलया चापि वाचामधीशा ॥ ६३ ॥
आधिव्याधिजरापमृत्युदुरितैर्भूतैः समस्तैर्विषै-
र्दौर्भाग्येन दरिद्रतादिभिरसौ दूरं विमुक्तश्चिरम् ।
सत्पुत्रैः ससुतैश्च मित्रनिवहैर्जुष्टोऽ(भि ? ब)लाभिः सदा
संपद्भिः परिपुष्ट ईडितयशा जीवेदनेकाः समाः ॥ ६४ ॥
अखिलमनुषु म(न्त्रो ? न्त्रा)वैष्णवा वीर्यवन्तो
महिततरफलाढ्यास्तेषु गोपालमन्त्राः ।
प्रबलतर इहैषोऽमीषु संमोहनाख्यो
मनुरनुपमसंपत्कल्पनाकल्पशाखी ॥ ६५ ॥
मनुमिममतिहृद्यं यो भजेद् भक्तिनम्रो
जपहुतयजनाद्यैर्ध्यानवान् म(न्त्र ? न्त्रि)मुख्यः ।
त्रुटितसकलकर्मग्रन्थिरुद्बुद्धचेता
व्रजति स तु पदं तन्नित्यशुद्धं मुरारेः ॥ ६६ ॥
अङ्गीकृत्यैकमेषां मनुमथ जपहोमार्चनान्तैर्मनूना-
मष्टाङ्गोत्सादितारिः प्रमुदितपरिशुद्धप्रसन्नान्तरात्मा ।

योगी युञ्जीत योगाननु[1]चितविहृतिस्वप्नबोधाहृतिः प्रा-
गास्यः सन्नासने स्वे सुमृदुनि सुखसंमीलिताक्षो निषण्णः ॥ ९७ ॥
विश्वं भूतेन्द्रियान्तःकरणमयमिनेन्द्वग्निरूपं समस्तं
वर्णान्ते तत्प्रधाने कलनयनमये बीजरूपे ध्रुवेण ।
नीत्वा तत्पुंसि बिन्द्वात्मनि तमपि परात्मन्यथो कालतत्त्वे
तच्च च्छक्तौ चिदात्मन्यपि लयतु च तं केवलेधाम्नि शान्ते ॥ ९८ ॥
निर्द्वन्द्वे निर्विशेषे निरतिशयमहानन्दसान्द्रेऽवसानो-
पेतेऽथो कृष्णपूर्वां मनुमहितगिरं शाश्वतेऽप्यात्मनीत्थम् ।
संहृत्याभ्यस्य बीजोत्तममथ[2]सकले लीननिःश्वासचेताः
प्रक्षीणापुण्यपुण्यो निरुपमपरसंवित्स्वरूपः स भूयात् ॥ ९९ ॥
मूलाधारे त्रिकोणे तरुणतरणिभाभास्वरे विभ्रमन्तं
कामं बालार्ककालानलज[3]रठकुरङ्गाङ्ककोटिप्रभाभम् ।
विद्युन्मालासहस्रद्युतिरुचिरलसद्बन्धुजीवाभिरामं
त्रैगुण्याक्रान्तबिन्दुं जगदुदयलयैकान्तहेतुं विचिन्त्य ॥ १०० ॥
तस्योर्ध्वे विस्फुरन्तीं स्फुटरुचिरतडित्पुञ्जभास्वत्स्वभावा-
मुद्गच्छन्तीं सुषुम्णासरणिमनुशिखामाललाटेन्दुबिम्बम् ।
चिन्मात्रां सूक्ष्मरूपां कलितसकल···श्वाक्कथानादगम्यां(?)
मूलं या सर्वधाम्नां स्मरतु निरुपमां हूंकृतोदश्चिताम्बाम् ॥ १०१ ॥
नीत्वा तां शनकैरधोमुखसहस्रारारुणाब्जोदरे
द्योतत्पूर्णशशाङ्कबिम्बमनुतः पीयूषधारास्रुतिम् ।
रक्तां मन्त्रमयीं निपीय च सुधानिःस्यन्दरूपां विशेद्
भूयोऽप्यात्मनिकेतनं पुनरपि प्रोत्थापयेत्त्वा[4]विशेत् ॥ १०२ ॥
योऽभ्यस्येदनुदिनमेवमात्मनोऽन्त-
र्बीजेशं दुरितजरापमृत्युरोगान् ।

१ 'दि' क. पाठः । २ 'शकलैर्नील' क. पाठः । ३ 'जठर' क. पाठः । ४ 'यित्वा' क. पाठः ।

जित्वासौ स्वयमिव मूर्तिमाननङ्गः
संजीवेच्चिरमलिनीलकेशपाशः ॥ १०३ ॥
स्फुटमधुरपदार्णश्रेणिरत्यद्भुतात्मा
झटिति वदनपद्मान्निःसरत्यस्य वाणी ।
अपि च सकलमन्त्रास्तस्य सिध्यन्ति मङ्क्षु
व्युपरमघनसौख्यैकास्पदं वर्तते सः ॥ १०४ ॥
भ्राम्यन्मूर्तिं मूलचक्रादनङ्गं
स्वाभिर्भाभी रक्तपीयूष(स्रग्भिः ? स्रुद्भिः) ।
बिम्बाकाशं पूरयन्तं विचिन्त्य
प्रत्यावेश्यास्तत्र व[१]श्याय साध्याः ॥ १०५ ॥
नार्यो नरा वा नगरी सभापि वा
प्रवेशितास्तत्र निशातचेतसा ।
स्युः किंकरास्तस्य झटित्यनारतं
चिराय तन्निघ्नधियो न संशयः ॥ १०६ ॥
तरणिदल(न ? स) नाथे शक्र[२]गोपारुणेऽथो
रविशशिशिखिबिम्बप्रस्फुरच्चारुमध्ये ।
हृदयसरसिजेऽमुं श्यामलं कोमलाङ्गं
सुमुखमुपनिविष्टं संस्मरेद् वासुदेवम् ॥ १०७ ॥
पादाम्भोजद्वयेऽङ्गुल्यमलकिसलये चा[३]वनौ सन्नखानां
सत्कूर्मोदारकान्तौ प्रपदयुजि लसज्जङ्घिकादण्डयोश्च ।
जान्वोरूर्वोः पिशङ्गे नववसनवरे मेखलादाम्नि नाभौ
रोमावल्यामुदारोदरभुवि विपुले वक्षसि प्रौढहारे ॥ १०८ ॥
श्रीवत्से कौस्तुभे च स्फुटकमललसद्वद्धसद्दाम्नि बाह्वो-
र्मूले कीयूरदीप्ते जगदवनपटौ दोर्द्वये कङ्कणाढ्ये ।

---

१ 'वैश्या' क. पाठः । २ 'शत्रु' क. पाठः । ३ 'ष्वा' क. पाठः ।

पाणिद्वन्द्वाङ्गुलिस्थे सुमधुररवसंलीनविश्वे च वेणौ
कण्ठे सत्कुण्डलोस्रस्फुटरुचिरकपोलस्थलद्वन्द्वके च ॥ १०९ ॥
कर्णद्वन्द्वेऽथ घोणे नयननलिनयोर्भ्रूविलासे ललाटे
केशेष्वालोलबर्हेष्वतिसुरभिमनोज्ञप्रसूनोज्ज्वलेषु ।
शोणे विन्यस्तवेणावधरकिसलये दन्तपङ्क्त्यां स्मिताख्य-
ज्योत्स्नायामादिपुंसः क्रमत इति शनैः स्वंमनः संविधत्ताम् ॥ ११० ॥
यावन्मनो विलयमेति हरेरुदार-
मन्दस्मिते जपतु तावदनङ्गबीजम् ।
अष्टादशार्णमथवापि दशार्णकं वा
मन्त्रं शनैरथ समाहितमातरिश्वा ॥ १११ ॥
आरोप्यारोप्य मनः पादारविन्दादिह स्मि[1]तान्तम् ।
अत्र विलाप्य क्षीणचेतसि सुखचित्सदात्मको भवति ॥ ११२ ॥
जपपूजाहोमतर्पणमन्त्राभिषेकविनियोगानाम् ।
दीपिकेयं मयोद्भास्यते क्रमतः कृष्णमन्त्रगदितानाम् ॥ ११३ ॥
संशयतिमिरच्छि(द्र ? दु)रा चैषा क्रमदीपिका करेण महद्भिः ।
करदीपिकेव धार्या(स्व ? स)स्नेहमहर्निशं समस्तसुखावाप्त्यै ॥ ११४
यश्चक्रं[2] निजकेलिसाधनमधिष्ठानस्थितोऽपि प्रभुः
प्रत्तं मन्मथशत्रुणा रणकृतौ व्याकृत्य लोकातिगम् ।
धत्ते दीप्तनवेन्दुभाननमघोपेतात्तमायं ध्रुवं
वन्दे का[3]लियमर्दनस्वधःकृ(?)तं भुक्तद्युकं यादवम् ॥ ११५ ॥
गोप्यङ्के लुठनपरं विलूनपाप-
मुर्वीशं मुदमदपदमह्नः कृषीष्ठाः(?) ।
यद्देवेशितुरपनेतृभीतमेति
तीतिग्मांशोर्नृपतेः परेषु याति(?) ॥ ११६ ॥

१ 'सिता' क. पाठः । २ 'क्रान्ति' ख. पाठः । ३ 'कायविम' ख. पाठः ।

जगदिदमनुविद्धं येन यस्मिन्[1] प्रसूते
यदनु ततमजस्रं पाति चाधिश्रितो यः ।
यदुरुमहदुदर्चिर्यद्विधत्ते च गोपी
तममृतसुखबोधज्योतिषं नौमि कृष्णम् ॥ ११७ ॥

इति श्रीक्रमदीपिकायां (वश्यादिप्रयोगविधाननिरूपणं) नाम
अष्टमः पटलः समा(प्ता?प्तः) ॥ ८ ॥

समाप्तोऽयं ग्रन्थः शुभमस्तु ॥



---

१ 'यस्मात्' क- पाठः ।